Sasthramukthavali-39.

PANCHALAKSHANI.

—(*)—

BY

Mahamahopadhyaya Sri Gadadharabhatta cl

WITH

MANI AND DIDHITI

OF

Gangesopadhyaya & Raghunathasiroman

EDITED BY

P. B. ANANTHACHARYA

Printed at the

SRI SUDARSANA PRESS.

CONJEEVERAM.

1911.

शास्त्रमुक्तावळी—३९.

पञ्चलक्षणी ।

महामहोपाध्याय श्रीगदाधरभट्टाचार्य विरचिता

—(*)—

श्रीमद्गङ्गेशोपाध्यायेन रघुनाथशिरोमणिना च विरचिताभ्यां

मणि दीधितिभ्यां सह

श्रीकाञ्ची प्रतिवादिभयङ्करानन्ताचार्येण परिशोधिता

श्रीसुदर्शनमुद्राक्षरशालायां

अमुद्यत ।

श्रीकाञ्ची ।

१९११

श्रीरस्तु ।
श्रीहयग्रीवाय नमः ।

शास्त्रमुक्तावळी ।

तत्त्वचिन्तामणौ-

पञ्चलक्षणी ।

*व्याप्तिग्रहोपायश्च वक्ष्यते ।

[दीधितिः ।]

सर्वमिदं सति व्याप्तिनिश्चये स्यात्, सएव न सम्भवति, उपाया- भावादित्यतआह- व्याप्ती ति ।

[गदाधरीयम् ।]

सर्वमिदम् – अनुमानप्रामाण्यव्यवस्थापकयुक्तिप्रदर्शनम् । **व्याप्ति** **निश्चये सती** त्यन्वयः । **सएव**- व्याप्तिनिश्चय एव । **न सम्भवति**— ोत्पत्तुमर्हति । **उपायाभावात्**- निश्चायकाभावात् । अनुमानप्रामाण्योप ादकतया व्याप्तिग्रहोपायस्यैवेदानीमभिधातुमुचितत्वात् वक्ष्यत इत्यनेन

* प्रत्यक्षोपजीवकत्वात् प्रत्यक्षानन्तरं बहुवादिसम्मतत्वादुपमानात् प्रागनु ानं निरूप्यते । तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्य ज्ञानमनुमितिः, तत्करणमनु ानम्, तच्च लिङ्गपरामर्शो न तु परामृश्यमानं लिङ्गमिति वक्ष्यते ।

अथानुमानं न प्रमाणम्, योग्योपाधीनां योग्यानुपलब्ध्याऽभावनिश्चयेऽप्ययो ोपाधिशङ्कया व्यभिचारसंशयात्, शतशः सहचरितयोरपि व्यभिचारोपलब्धेश्च; ोके धूमादिदर्शनानन्तरं वह्न्यादिव्यवहारश्च सम्भावनामात्रात्, संवादेन च ्रमाण्याभिमानादिति नाप्रत्यक्षं प्रमाणमिति न; अप्रमाणसाधर्म्येणाप्रामाण्यसाधने ष्टसाधर्म्यस्यानुमानत्वात्, एतद्वाक्यस्य सन्दिग्धविपर्यस्तान्यतरं प्रत्यर्थवत्त्वात्, तयो परकीययोरप्रत्यक्षत्वात्, अनुमानमप्रमाणमिति वाक्यस्य प्रामाण्याप्रामाण्ययो ्घाताच्च । अपिच्चानुमानाप्रामाण्ये प्रत्यक्षस्याप्यप्रमाणत्वापत्तेः, प्रामाण्यस्यानुमेय- ात्। स्वतश्च प्रामाण्यग्रहे तत्संशयानुपपत्तेः।[इत्येताः पङ्क्तयोऽप्यत्रानुसन्धेयाः।]

नन्वनुमितिहेतुभूतव्याप्तिज्ञाने काव्याप्तिः?

[दी] समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रति पादननिदानं व्याप्तिस्वरूप निरूपणमारभते- नन्वित्यादिना ।

तत्परीक्षां विधाय, व्याप्तिस्वरूपनिरूपणमयुक्तमित्याशङ्कां परिजिहीर्षु स्तत्प्राथम्ये तस्य व्याप्तिग्रहोपायप्रतिपादनौपयिकत्वरूपं बीजं दर्शयन् नन्वित्यादिग्रन्थमवतारयति- **समारब्धे**ति। व्याप्तिग्रहोपायाकथनेन प्रामाण्य व्यवस्थापनस्यानिष्पन्नत्वात् **समारब्धे**ति परीक्षाविशेषणम् । परीक्षा च परमतनिराकरणपूर्वकस्वमतव्यवस्थापनम् । **कारणीभूते**ति प्रतिपादन विशेषणम् । यद्यपि व्याप्तिग्रहोपायप्रतिपादनस्यानुमानप्रामाण्यव्यवस्थापकत्व कथनं न तस्यावश्यकत्वप्रदर्शनाय; **व्याप्तिग्रहोपायश्च वक्ष्यत** इत्येत- द्ग्रन्थावतारणाद्व्याप्तिग्रहोपायस्यानुमानप्रामाण्योपपादकतालाभेनैव तल्लाभात्; तथापि प्रामाण्यव्यवस्थापननिर्वाहकतया भवतु व्याप्तिग्रहोपायप्रतिपादन स्येदानीमाकांक्षितत्वम् , एवमपि तत्र व्याप्तिस्वरूपनिरूपणं विना सम्भ वतीति प्रथमतस्तदेवोचितमित्येतत्सूचनायैतदभिहितम् । **निदान**मिति । व्याप्तिघटकीभूताव्यभिचारांशभाने बाधाभावमुद्रया व्यभिचारज्ञानाभावो हेतुः, साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकांशग्रहे विशेषणज्ञानमुद्रया सहचारग्रहोहेतुरिति क्रमेण व्याप्तिग्रहोपायप्रतिपादनस्य व्याप्तिस्वरूप मप्रतिपाद्याशक्यत्वादिति भावः । प्रथमतः पूर्वपक्षस्यैवाभिधानेन निरूप यतीत्यसङ्गतम् , अतः **आरभत** इत्युक्तम् । निरूपणस्य परमतनिराकरण पूर्वकसिद्धान्तकथनरूपतया पूर्वपक्षाभिधान तत्खण्डनयोरपि तदारम्भण रूपत्वेति ध्येयम् ।

नतावदव्यभिचरितत्वम्, तद्धि न साध्याभाववदवृत्तित्वम्,

मूले न तावदव्यभिचरितत्व मिति । व्याप्ति रिति प्रश्नस्थ मनुषज्यते । तथाचाव्यभिचारपदार्थो नानुमितिजनकज्ञानविषय इत्यर्थः । अनुमितिजनकत्वं नाव्यभिचारपदार्थावच्छिन्नहेतुविषयताघटितधर्मावच्छिन्न मिति पर्यवसितम् । अत्र हेतुमाह— **तद्धि न साध्याभाववदवृत्तित्व** मित्यादि । हि- यतः । साध्याभाववदवृत्तित्वादिरूपम्, **तत्**- अव्यभिचरित त्वम् । **न व्याप्ति** रित्यनुषङ्गेणान्वयः । तथाच साध्याभाववदवृत्तित्वादि रूपाः ये अव्यभिचारपदार्थाः तदवच्छिन्नहेतुविषयताघटितधर्मावच्छिन्न त्वाभावकूटवत्त्वादिति निरुक्तपर्यवसितसामान्याभावसाधकः फलितो हेतुः । नचाप्रयोजकत्वम्, विशेषाभावकूटस्य सामान्याभावव्याप्यताया मवि- वादात् । तत्र साध्याभाववदवृत्तित्वादिरूपाः ये पञ्चाव्यभिचारपदार्थाः तदवच्छिन्नविषयताघटितधर्मावच्छिन्नत्वाभावस्य प्रत्येकसाधकं हेतुं व- क्ष्यति— **केवलान्वयिन्यभावा** दिति । साध्ये अत्यन्ताभावाप्रतियोगित्वा न्योन्याभावप्रतियोगितानवच्छेदकत्वरूपकेवलान्वयित्वग्रहदशाया मत्यन्ता न्योन्याभावयोः साध्यतद्वत्त्वावच्छिन्नप्रतियोगिताकत्वभानासम्भवेन प्रति योगितया साध्यतदाश्रयविशेषितात्यन्तान्योन्याभाववदवृत्तित्वावच्छिन्नविष- यतायास्तादृशविशेषदर्श्यनुमितिजनकज्ञाने अभावादित्यर्थः । एवञ्च तादृशविषयताशून्यवृत्तित्वमेव अनुमितिजनकतायां दर्शितसाध्यसाधको हेतुरभिमत इति नासिद्ध्यादिः । ईदृशदिशा अग्रिमहेतवोपि परि ष्करणीयाः ।

साध्यवद्भिन्न साध्याभाववदवृत्तित्वम् ,

[दी] अव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशङ्कयाह— साध्यव-द्भिन्ने ति । साध्यवद्भिन्ने य स्साध्याभाव स्तद्वदवृत्तित्वमर्थः ।

दीधितौ अव्याप्ये ति । कपिसंयोगी एतद्वृक्षत्वादित्यादावित्यर्थं अव्याप्ति मिति । तत्र हेत्वधिकरणे एतद्वृक्षादावन्यदेशकालावच्छे- कपिसंयोगाद्यभावसत्त्वादिति भावः । साध्यवद्भिन्नो यस्साध्याभाववानि- कर्मधारये अभेदसम्बन्धेन साध्यवद्भिन्नीयं यत्साध्याभावाधिकरणं तद- वृत्तित्वमर्थस्स्यात् , तथासति तद्घटकीभूतस्याभेदसम्बन्धेन साध्यवद्भिन्नी- यत् तदवृत्तित्वस्यैव लक्षणत्वसम्भवा त्साध्याभाववत्त्वांशस्य वैयर्थ्यापत्तिः अतस्साध्याभावपदेन साध्यवद्भिन्नपदस्य सप्तमीतत्पुरुषं व्याचष्टे- साध्य वद्भिन्न इति । तथाच साध्यवद्भिन्नवृत्ति र्यस्साध्याभावः तद्वदवृत्ति- मर्थः, तत्र पूर्ववदभेदेन साध्यवद्भिन्न पदार्थविशेषित धर्म्यवृत्तित्वादे- घटकता, वृत्त्यादिविशेषणतयैव साध्यवद्भिन्नस्य निवेशादिति न साध्याभावां- वैयर्थ्यमिति भावः ।

अभावे साध्यीयत्वानिवेशे ह्रदादिवृत्तिगगनाद्य भाववति पर्वतादि- धूमादेर्वृत्तेरसम्भव इति तद्वारणाय साध्यपदम् । नचाधिकरणभेदेन- भावभेदमत एवैतल्लक्षणकरणात् पर्वतादेर्न ह्रदादिवृत्त्यभाववत्त्वमिति वाच्यम्, अव्याप्यवृत्तिप्रतियोगिकाभावस्य व्याप्यवृत्तित्वाव्याप्यवृत्तित्वरूपविरुद्ध- धर्माध्यासेन भेदस्य लक्षणकर्तुस्सम्मतत्वादाकाशाभावादेर्भेदकाभावेन न- स्यैक्यात् । अतएव उक्तधर्माणां भेदकत्वं “ एतानि च न भेदकानी ” त्यनेन दीधितिकृन्निराकरिष्यति । अथवा साध्याभावपदमनुयोगिता- विशेषसम्बन्धेन साध्यीयपरम् , अभावीयविलक्षणानुयोगितालाभाय- अभावपदम् , नत्वभावत्वमपि निवेश्यम् , प्रयोजनाभावात् , इत्थं च तादृशविलक्षणसम्बन्धेन यस्साध्यीयः तद्वदवृत्तित्वमित्येवार्थः

तत्र च साध्यस्य यत्पदार्थविशेषणत्वे ह्रदादिवृत्तिप्रमेयत्वादिमति पर्वतादौ हेतोर्वृत्तेरसम्भवस्स्यादिति तन्निवेशः ।

अत्र च साध्याभावस्साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको बोध्यः, अन्यथा वह्निमान् धूमादित्यादौ ह्रदादिनिष्ठमहानसीयवह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभावस्य धूमवति सत्त्वेन, पृथिवीत्वाभावद्रव्यत्वाभावान्यतरवान् जलत्वादित्यादौ साध्यवद्भिन्नपृथिव्यादिनिष्ठद्रव्यत्वाद्यात्मकसाध्यप्रतियोगिकाभावस्य जलादौ सत्त्वेन चाव्याप्त्यापत्तः । साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनापि प्रतियोगिता विशेषणीया, अन्यथा ह्रदादिवृत्तिसमवायादिसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्याद्यभावस्य धूमादिमत्यपि वृत्तेः असम्भवस्य, कालिकसम्बन्धेन द्रव्यत्वाभावादौ साध्ये कालत्वादिहेतौ साध्यवद्भिन्नपरमाणुगगनादिवृत्तिदैशिकविशेषणतासम्बन्धावच्छिन्नप्रतियोगिताक - साध्याभावात्मकद्रव्यत्वादेर्हेत्वधिकरणवृत्तित्वेनाव्याप्तेर्वा प्रसङ्गात् ।

अत्र च साध्याभाववत्तायां सम्बन्धविशेषावच्छिन्नत्वानिवेशे वह्निमान् धूमादित्यादौ ह्रदादिवृत्तिवह्न्याद्यभावस्य कालिकसम्बन्धेन पर्वतादौ वृत्तेरव्याप्तिः, दैशिकविशेषणताविशेषावच्छिन्नत्वनिवेशे कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभावादौ दैशिकविशेषणतया साध्ये आत्मत्वादिहेतौ साध्यवद्भिन्नकालादिवृत्तेराकाशाभावात्मकसाध्याभावस्य आत्मादिषु वृत्तेः घटत्वाभावादिसाध्यकसद्धेतौ साध्याभावस्य घटत्वादेर्दैशिकविशेषणतासम्बन्धेन अधिकरणतायां मानाभावेन चाव्याप्तिः, अतः साध्यतावच्छेदकसम्बन्धेन साध्यवत्ताज्ञानम्प्रति यादृशसम्बन्धेन स्वप्रकारकनिश्चयः प्रतिबन्धकः तेन सम्बन्धेनाभाववत्त्वं निवेश्यम्; संयोगेन वह्न्यादौ साध्ये तादृशसम्बन्धो दैशिकविशेषणता, कालिकसम्बन्धेनाकाशाभावाभावे दैशिकविशेषणतया साध्ये कालिकसम्बन्ध एव तथा, समवायादिना घटत्वादेरभावे दैशिकविशेषणतया साध्ये समवायादिरेवेति न दोषः । नचैवं वृक्षनिष्ठा या कपिसंयोगाभावीय मूलावच्छिन्नविशेषणता

तादृशसम्बन्धेन वृक्षादौ तादृशाभाववत्ताज्ञानेपि कपिसंयोगवत्ताज्ञानोत्पत्तेः तादृशसम्बन्धो न लक्षणघटक इति साध्यवद्भिन्नवृत्तित्वविशेषणं व्यर्थमिति वाच्यम् , संयोगतदभावयो रविरुद्धत्वज्ञानाभावदशायां वृक्षः कपिसंयोगाभाववानिति ज्ञानस्यापि वृक्षे कपिसंयोगवत्ताज्ञानविरोधितया वृक्षनिष्ठतदभावीयविशेषणताया अपि साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकीभूतसंसर्गताश्रयत्वात् ।

केचित्तु — साध्यात्मकाभावनिरूपितप्रतियोगितावच्छेदकसम्बन्धेन साध्याभाववत्त्वं विवक्षितम् , स च सम्बन्धो यत्सम्बन्धावच्छिन्नप्रतियोगिताकस्वाभाव स्साध्यात्मक स्स इति नोक्तानुपपत्तिः ; अथ समवायेन प्रमेयत्वावच्छिन्नसाध्यकद्रव्यत्वप्रकारकप्रमाविशेष्यत्वादिहेतुकस्थले कालिकसम्बन्धस्यापि तत्सम्बन्धावच्छिन्नप्रतियोगिताकघटाभावरूपप्रमेयनिरूपितप्रतियोगितावच्छेदकत्वात् तेन सम्बन्धेन साध्याभाववति काले हेतोर्वृत्तेरव्याप्तिः; नच साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसम्बन्धनिवेशान्नायं दोषः, कालिकसम्बन्धावच्छिन्नघटाभावादिरूपप्रमेयस्य कालिकसम्बन्धावच्छिन्नप्रतियोगितायाः घटादावेव सत्त्वात्कालिकसम्बन्धस्य समवायसम्बन्धावच्छिन्न प्रमेयाभावात्मक स्वनिष्ठप्रतियोगितावच्छेदकसम्बन्धत्वविरहादिति वाच्यम् ; — तादृशप्रमेयाभावस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताको यो ऽभावः तस्यापि प्रमेयत्वेन साध्यतया तन्निरूपिततादृशप्रमेयाभावरूपस्वनिष्ठप्रतियोगितावच्छेदकत्वस्य कालिकसम्बन्धे अक्षततया अव्याप्तेर्दुर्वारत्वात् ; नच यावत्साध्यनिरूपितप्रतियोगिता निवेशनीया, तथाचोपदर्शिताभावात्मकयत्किञ्चित्प्रमेयनिरूपितस्वनिष्ठप्रतियोगितावच्छेदक कालिकसम्बन्धमादाय न दोष इति वाच्यम् , असमवेतप्रमेयस्य समवायसम्बन्धावच्छिन्नप्रमेयाभावो ऽत्र नास्तीति प्रत्ययाविषयतया तादृशप्रमेयाभावाभावत्वे मानाभावात् तादृशप्रमेयाभावनिष्ठयावत्प्रमेयनिरूपितप्रतियोगित्वाप्रसिध्या उक्तस्थले अव्याप्तितादवस्थ्यात् ;नच साध्यता-

वच्छेदकसम्बन्धेन वृत्तिमद्यावत्साध्यनिरूपितप्रतियोगितायाः निवेशनीयतया नोक्ताप्रसिद्धिरिति वाच्यम्, सर्वत्र समवायिन्येकया सत्तयैव तादृशप्रमेयाभावाभाववत्ताप्रतीतिनिर्वाहे सर्वसमवाय्यसङ्ग्राहकगुणादीनां तादृशप्रमेयाभावाभावत्वे मानाभावेन दर्शिताप्रसिद्धेर्दुर्वारत्वात्; इति चेन्न; साध्यतावच्छेदकसम्बन्धेनवृत्तिमद्यत्किञ्चित्साध्यनिरूपितस्वनिष्ठप्रतियोगितावच्छेदकसम्बन्धानि - वेशेनोपपत्तेः, कालिकसम्बन्धावच्छिन्नप्रतियोगिताकस्य दर्शितसाध्याभावाभावस्य साध्यत्वेपि तस्य साध्यतावच्छेदकसमवायसम्बन्धेनावृत्तित्वात्। नचैवमपि कालिकसम्बन्धेन प्रमेयसाध्यककालत्वादिहेतावव्याप्तिः, कालिकसम्बन्धावच्छिन्नप्रतियोगिताकप्रमेयाभावस्य यः कालिकसम्बन्धावच्छिन्नप्रतियोगिताको ऽभावः तस्य स्वाभावात्मकस्य प्रमेयत्वेन साध्यस्य प्रतियोगितावच्छेदकीभूतकालिकसम्बन्धेन कालिकसम्बन्धावच्छिन्नप्रमेयाभावाधिकरणे हेतोर्वृत्तेरिति वाच्यम्; तादृशप्रतियोगितावच्छेदकयत्सम्बन्धेन साध्यवद्भिन्नवृत्तित्वमभावस्य तत्सम्बन्धेन तद्वत्त्वस्य विवक्षणीयत्वात्; उक्तस्थले च साध्याभावस्य कालिकसम्बन्धेन साध्यवद्भिन्ने अवृत्तेः। अथैवं तादृशप्रतियोगितायां स्वनिष्ठत्वनिवेशो विफलः, तदनिवेशे घटभिन्नं घटत्वाभावादित्यादौ घटभेदात्मकसाध्यनिरूपितप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन घटत्वात्मकसाध्याभाववति घटत्वे घटत्वाभावरूपहेतोर्वृत्ते रव्याप्तिप्रसक्तावपि तादृशाव्याप्तेरीदृशविवक्षयैव वारणसम्भवात्, घटत्वरूपसाध्याभावस्य साध्यनिरूपितप्रतियोगितावच्छेदकतादात्म्यसम्बन्धेन साध्यवद्भिन्ने घटे ऽवृत्तेः; नचैवं तादृशसाध्यस्य तादृशसम्बन्धेन साध्यवद्भिन्नवृत्तिरभाव एवाप्रसिद्ध इति कथमव्याप्तिपरिहार इति वाच्यम्, घटभेदस्य घटत्वाभावसमानियतत्वेन तदभिन्नतया घटत्वेपि समवायसम्बन्धावच्छिन्नायास्तादृशप्रतियोगितायास्सत्त्वेन तादृशप्रतियोगितावच्छेदकसमवायेन साध्यवद्भिन्नवृत्तिघटत्वरूपसाध्याभावस्य प्रसिद्धिसम्भवात्; तादृशाभावयोर्भेदे स्वनिष्ठत्वस्य प्रतियोगिताविशेषणत्वेपि

घटत्वरूपसाध्याभावनिष्ठसाध्यनिरूपितप्रतियोगित्वाप्रसिद्ध्या तद्दोषतादव स्थ्यात्; संयोगिभेदस्य व्याप्याव्याप्यवृत्तित्वरूपवैधर्म्येण संयोगाभावा भेदासम्भवेपि संयोगवत्त्वप्रमाविषयत्वाभावाभेदे बाधकाभावात्स्वरूपसम्बन्ध स्यापि साध्यनिरूपितप्रतियोगितावच्छेदकसम्बन्धतया तेन सम्बन्धेन साध्यवद्भिन्नवृत्तेस्तादृशप्रमाविषयत्वरूपसाध्याभावस्यप्रसिद्ध्या संयोगिभिन्नं गुणत्वादित्यादावव्याप्तेरनवकाशात्; इतिचेन्न; -- प्रतियोगितायां स्वनि-ष्ठत्वानिवेशे कालिकसम्बन्धावच्छिन्नप्रतियोगिताके आकाशाभावाभावादौ साध्ये आत्मत्वादिहेतावव्याप्तेर्दुर्वारत्वात्, तादृशसाध्यस्य यः कालिक सम्बन्धावच्छिन्नाभावः दैशिकविशेषणतासम्बन्धावच्छिन्नतदभावस्य तादृश साध्यस्वरूपतया दैशिकविशेषणतासम्बन्धस्य साध्यनिरूपितप्रतियोगिता वच्छेदकसम्बन्धत्वात्तेन सम्बन्धेन आकाशाभावरूपसाध्याभावस्य साध्य वद्भिन्नकाले हेतुमति च वृत्तेः । प्रतियोगितायां स्वनिष्ठत्वनिवेशे दैशिक विशेषणतायाः आकाशाभावनिष्ठसाध्यनिरूपितप्रतियोगितावच्छेदकसम्ब-न्धत्वविरहेणाव्याप्तेरनवकाशात् । नच साध्यनिरूपितस्वनिष्ठप्रतियोगिता निवेशे साध्याभावपदोपादानवैयर्थ्यम्, अभावान्तरनिष्ठप्रतियोगितायाः स्साध्यनिरूपितत्वविरहेणैव तद्व्यावृत्तेरिति वाच्यम्; स्वपदार्थस्य द्विधा निवेशेन साध्याभावनिष्ठसाध्यीयप्रतियोगितावच्छेदकसम्बन्धेन साध्या भाववत्त्वनिवेशध्रौव्येण तत्पदवैयर्थ्यानवकाशात् । तादृशसम्बन्धेन साध्य वद्भिन्नवृत्तिमत्त्वमात्रनिवेशे साध्यवद्भिन्नवृत्त्यभावान्तरवति हेतोर्वृत्त्या अनु पपत्तेः । इत्याहुः ।

अत्रेदंबोध्यम्;— साध्यवत्त्वग्रहविरोधिग्रहविषयसम्बन्धत्वेन साध्य निरूपितप्रतियोगितावच्छेदकसम्बन्धत्वेन वा नानुमित्यौपयिकव्याप्तिशरीरे अभावसम्बन्धनिवेशसम्भवः, साध्यादिभेदेन व्याप्तेर्भेदात्, लाघवेन तत्तत्सा ध्यकस्थले तत्तत्साध्याभाववति दैशिककालिकविशेषणतासमवायादिसंसर्गाणा मेव विशिष्याभावसम्बन्धतया निवेशौचित्यात्, उक्तरूपेण विशेषणताविशेषा-

दीनां सम्बन्धताया अत्यन्तमप्रामाणिकतया तद्रूपावच्छिन्नस्य सम्बन्धवि व्याप्तिघटकत्वायोगाच्च ; परन्तु यादृशसाध्यकस्थले यादृशसम्बन्धो ऽ सम्बन्धतया व्याप्तिघटकः तत्परिचयायैव दर्शितोक्तयः; तथाच या सम्बन्धेन प्रकृतसाध्यवति तद्भिन्नवृत्तिसाध्याभावो न वर्तते तादृश न्धेन तद्वत्त्वं निवेश्यमित्युक्त्यैव तत्परिचयसम्भवादलं वाग्जालेन ।

साध्याभाववत्पदेन साध्याभावत्वविशिष्टाधिकरणं विवक्षणीयम् , "गुणान्यत्वविशिष्टसत्ताभाववान् गुणत्वा" दित्यादौ विशिष्टस्यानतिरिक्त सत्तारूपसाध्याभावस्य गुणादौ सत्त्वेपि न क्षतिः; गुणे गुणान्यत्ववि सत्ताभावो नास्तीत्यप्रत्ययात् तत्र तादृशाभावत्वविशिष्टाधिकरण नभ्युपगमात् ।

अथैतल्लक्षणे " घटत्वघटाकाशसंयोगान्यतराभाववान् आकाशत्व दित्यादावव्याप्तिः, घटत्वस्य व्याप्यवृत्तितया तद्घटितान्यतराभाववा घटे वर्तमानस्य घटाकाशसंयोगात्मकसाध्याभावस्य हेत्वधिकरणे गग वृत्तेः; निरवच्छिन्नसाध्याभाववत्तानिवेशे च साध्यवद्भिन्नवृत्तित्वनिवे वैयर्थ्यादिति चेन्न ; — एतल्लक्षणकर्तृमते स्वप्रतियोगिसामानाधिक स्वप्रतियोगिवैयधिकरण्यरूपविरुद्धधर्माध्यासो ऽभावभेदक इत्येत मुक्त्या द्रव्यवृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयोर्भेदसिद्धिरित्यव्याप्य साध्यकस्थले ऽव्याप्तिस्समाधीयते, तथा च घटाकाशसंयोगस्योक्त तराभावप्रतियोगित्वेपि न तदभावरूपता, तथा सति तादृशविरुद्धध स्समावेशापत्तेः, तयोर्विरोधाभावे संयोगाभावस्याप्यधिकरणभेदेन भे सिद्धेः अव्याप्यवृत्तिसाध्यके सर्वत्रैवाव्याप्तेः; एतदभिप्रायेण लक्षणा स्यावतारणीयत्वादिति गगने अतिरिक्त एव तदभावस्स्वीकरणीयः च न साध्यवद्भिन्नवृत्तिरिति न दोषः ।

साध्यवत्प्रतियोगिकान्योन्याभावासामा-नाधिकरण्यम् ,

[दी] कर्मादौ संयोगाद्यभावस्य भिन्नत्वे मानाभावादाह - **साध्यव** दिति ।

" साध्यवद्भिन्ने वर्तेत " इत्यनेन निरवच्छिन्नवृत्तित्वरूपपर्यवसितार्थे तात्पर्यात् घटाकाशसंयोगात्मकाभावमादाय न दोष इति तु न श्रद्धेयम् ;–तथा सति सुषुप्त्यादिकालावच्छेदेन अस्मदाद्यात्मवृत्तौ स्वाश्रयाश्रयत्वसम्बन्धावच्छिन्नप्रतियोगिताकज्ञानत्वाद्यभावे साध्ये सुखादावव्याप्तिः, तत्र साध्यवद्भिन्ने ईश्वरे तादृशसम्बन्धेन निरवच्छिन्नवृत्तिकस्य ज्ञानत्वादिरूपाभावस्य तेन सम्बन्धेन सुखाद्यधिकरणे अस्मदाद्यात्मन्यपि वृत्तेः । उत्पत्तिकालावच्छिन्नघटादिवृत्तितादृशसम्बन्धावच्छिन्नप्रतियोगिताकसत्ताभावादिसाध्यकघटत्वादिहेतावव्याप्तिश्च ।

संयोगाभावनिष्ठयोः व्याप्यवृत्तित्वाव्याप्यवृत्तित्वयोः प्रतियोगिसामानाधिकरण्य प्रतियोगिवैयधिकरण्ययोः वक्ष्यमाणरीत्या न विरोध इत्यभिप्रायेण अव्याप्यवृत्तिसाध्यकस्थले अव्याप्त्या लक्षणान्तरमवतारयति – **कर्मादा** विति ।

इदं त्ववधेयम् ;—द्रव्यवृत्तिसंयोगाभावो न गुणादौ स्वीक्रियते, अपि तु क्लृप्ततद्वृत्तिसंयोगवत्त्वप्रकारकप्रमाविषयत्वाद्यभाव एव संयोगाभावत्वं कल्प्यते, अनन्तगुणाद्यधिकरणे संयोगाभावकल्पनामपेक्ष्य तथाविधैकाभावे संयोगाद्यभावत्वकल्पने लाघवात् ; नच संयोगवत्त्वप्रकारकप्रमाविषयत्वाद्यभावे द्रव्यत्वाभावद्रव्यभेदसंयोगिभेदादौ वा संयोगाभावत्वं कल्प्यत इत्यत्र विनिगमकाभाव इति वाच्यम्, तादृशाभावानां सम-

सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम्,

[दी] हेतोस्साध्यवत्पक्षभिन्नदृष्टान्तवृत्तित्वेनाव्याप्तेराह— सकले ति । साकल्यं साध्याभाववति साध्ये च बोध्यम् ।

नियततया अभेदात् । एवञ्च द्रव्यवृत्तिसंयोगाभावगुणवृत्तिसंयोगाभावयो र्भेद स्सप्रमाण एव । अथैवं द्रव्यत्वाभावादीनामप्यानन्त्यापत्तिः, कर्मादौ गुणवृत्तिद्रव्यत्वाभावो न कल्प्यते, अपि तु कलसतद्वृत्तिद्रव्यगुणान्यतरत्वाभाव एव तदभावत्वमित्यादितर्कगवेषणया कर्मादिवृत्तिद्रव्यत्वाभावस्य गुणादिवृत्तितदभावतो भेदसिद्धेरिति चेत् ?, इष्टमेवैतदधिकरणभेदेनाभावभेदवादिनाम् । नचैवं संयोगाभावत्वकल्पनायां धर्मिणामप्यानन्त्यादुक्तविनिगमकासम्भव इति वाच्यम्, विनिगमनाविरहेणापि द्रव्यत्वाभावादौ संयोगाद्यभावत्वकल्पनाया निष्प्रत्यूहत्वादिति ।

हेतो रिति । नानाधिकरणकस्येत्यादिः । अव्याप्ते रिति । "एतद्रूपवानेतद्रसा" दित्यादौ एतद्रसाद्यधिकरणे एतद्रूपाधिकरणस्य द्वित्वादिना भेदसत्त्वेपि व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन साध्यवन्निष्ठप्रतियोगित्वे प्रतियोग्यवृत्तित्वेन वा भेदे विशेषिते लक्षणगमनसम्भवान्नासम्भवो दर्शितः । साकल्य मिति । बोध्य मित्यस्य विशेषणमित्यादिः । अत्र साध्याभाववति साकल्यविशेषणसत्त्व एव साध्ये तद्विशेषणस्य व्यावृत्तिस्संगच्छते, अन्यथा साध्याभाववत्तायाः हेतुमत्साधारण्येपि साध्याभाववद्यत्किञ्चिद्व्यक्तिनिष्ठाभावप्रतियोगित्वमादाय नानाव्यक्तिसाध्यकसद्धेतौ लक्षणसमन्वयसम्भवात् । अतः "साध्ये तदभावतिचे" त्यनुक्त्वा साध्याभाववति साकल्यविशेषणं प्रथमतो दर्शितम् । नच साध्याभाववति

साकल्यविशेषणासत्त्वेपि "वह्निमान् पर्वतान्यत्वा" दित्यादौ अतिव्याप्ति वारणमेव साध्ये साकल्यप्रयोजनमस्ति, उभयत्र साकल्यविशेषणादाने यत्किंचित्साध्याभाववति पर्वते हेत्वभावसत्त्वा दतिव्याप्तिः; साध्ये साकल्यविशेषणसत्त्वे तु ह्रदादेरेव सकलसाध्याभाववत्तया तत्र हेतुसत्त्वेन अतिव्याप्त्युद्धारादिति नोक्ताभिप्रायवर्णनं सम्यगिति वाच्यम्;-- साध्याभाववति साकल्यविशेषणासत्त्वे साध्ये साकल्यविशेषणस्योक्तातिव्याप्तिवारणप्रयोजनकत्वसम्भवेपि वक्ष्यमाणप्रयोजनस्यैव वास्तवतया तस्य साध्याभाववति साकल्यविशेषणसत्त्वएव सङ्गतेः आदौ तत्प्रदर्शनस्योचितत्वात् ।

वस्तुतस्तु; — साध्ये साकल्यविशेषणं परित्यज्य साध्याभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वनिवेशनरूपकल्पान्तरस्यावलम्बनीयतया चरममेव तत्प्रदर्शनमुचितम्, "साध्ये तदभाववति च बोध्य" मित्युक्त्वा "साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको वा अभावो ग्राह्य" इत्युक्तौ 'साध्याभाववति साकल्यं निवेश्यते ? साध्याभावो वा एतादृशो निवेश्यते ?' इत्येतादृशविकल्पः प्रतीयेत, सच अविवक्षित इति तु सारम् ।

अव्याप्तिवारणाय साध्याभावे साकल्यविशेषणे "धूमवान् वह्ने" रित्यादौ साध्यतावच्छेदकीभूतसंयोगसम्बन्धावच्छिन्नप्रतियोगिताकसकलसाध्याभावाधिकरणं गुणादिरेव स्यात्, अयोगोळकादेः ह्रदासंयुक्तत्वावच्छिन्नाभावानधिकरणत्वा दित्यतिव्याप्तिः; "वह्निमत्त्वप्रकारकप्रमाविषयो धूमा" दित्यादौ साध्यतावच्छेदकीभूतस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावस्य तत्तद्विपक्षमात्रवृत्तितया सकलसाध्याभावाधिकरणाप्रसिद्ध्या अव्याप्तिश्चेति तदुपेक्ष्य साध्ये साकल्यविशेषणं निवेशितम् । ननु साध्ये साकल्यविशेषणदानेपि "वह्निमान्

[दी]साध्याभावो वा साध्यतावच्छेदकावच्छिन्नप्रतियोगिताको ग्राह्यः, तेन विपक्षैकदेशनिष्ठाभावप्रतियोगिनि व्यभिचारिणि नातिव्याप्तिः; न वा नानाव्यक्तिसाध्यकसद्धेतावव्याप्तिः।अव्याप्यवृत्ति साध्यकव्या प्यवृत्तिसद्धेतावव्याप्तेः व्यभिचारिणिचा व्याप्यवृत्तावतिव्याप्तेर्वारणाय

धूमा" दित्यादौ अव्याप्तितादवस्थ्यम्, पर्वतादावपि पर्वतीयवह्नेर्द्वित्वादिना अभावसत्त्वेन सकलसाध्याभावसत्त्वात्। व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वेनाभावविशेषणे च "वह्निधूमोभयवान् वह्ने" रित्यादावतिव्याप्तिः, वह्निमत स्तथाविधसकलसाध्याभावानधिकरणत्वात्। साध्यतावच्छेदकातिरिक्तो यो व्यासज्यवृत्तिधर्मः तदनवच्छिन्नप्रतियोगिताकत्वनिवेशने च लाघवा स्साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्यैवाभावे निवेशनमुचितम्, किं साध्ये साकल्यविशेषणेन? इत्यभिप्रेत्य तथैवाह—**साध्यतावच्छेदके** ति। साध्याभाववति साकल्यविशेषणप्रयोजनमाह—**विपक्षे** ति। वैकल्पिकयो स्साध्यतदभावयोः साकल्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वविशेषणयो र्व्यावृत्तिमाह-**नवे** ति। एकव्यक्तिसाध्यके "एतद्रूपवान् एतद्रसा" दित्यादौ हेत्वधिकरणे पूर्वक्षणवृत्तित्वविशिष्टसाध्याभावो न प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः, पूर्वक्षणवृत्तित्वविशिष्टैतद्रूपादे रेतद्रसाधिकरणे वृत्तेः। एतद्रूपतद्रूपोभयत्वावच्छिन्नोऽभावोपि न तथा, प्रतियोगितावच्छेदकावच्छिन्नाधिकरणाप्रसिद्धेः तत्र लक्षणसंगतेरित्यतो **नानाव्यक्तिके** त्युक्तम्। अतएवाव्याप्तिरेवोक्ता, नासम्भवः। अत्र च नानाव्यक्तिसाध्यकत्वं व्यधिकरणद्वयवृत्तिसाध्यतावच्छेदककत्वम्, अतएव "एतद्वृत्तियावद्धर्मवान् एतत्त्वा" दित्यादौ नानाव्यक्तिसाध्यके अव्याप्तिविरहेपि न क्षतिः।

अव्याप्यवृत्ती ति। "कपिसंयोगी एतद्वृक्षत्वा" दित्यादावित्यर्थः। **अव्याप्तेर्वारणाये** त्यन्वयः। **व्यभिचारिणिचे** ति। "एतद्वृक्ष

[दी] अभावद्वये प्रतियोगिवैयधिकरण्यं बोध्यम् ।

त्ववान् कपिसंयोगा" दित्यादावित्यर्थः । अभावद्वये— साध्याभावे हेत भावे च । तथाच अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तिवारण साध्याभावे, व्यभिचारिणिचाव्याप्यवृत्तावतिव्याप्तिवारणाय हेत्वभावे प्र योगिवैयधिकरण्यमित्यर्थः । यद्यपि हेत्वभावे प्रतियोगिवैयधिकर विशेषणस्यावश्यकतया "कपिसंयोगी कपिविभागा" दित्याद्यव्या वृत्तिहेतुके अव्याप्तिवारणप्रयोजनकत्वं साध्याभावे तद्विशेषणस्य सम्भ तीति व्याप्यवृत्ती त्यकिञ्चित्करम्, तथापि हेत्वभावे तद्विशेषणप्र सन्धानं विनैव व्याप्यवृत्तिहेतुकस्थले अव्याप्तिनिर्णयो भवतीत्य सन्धायैतदुक्तम ।

प्रतियोगिवैयधिकरण्यञ्च न प्रतियोग्यधिकरणावृत्तित्वम्, अव्या वृत्तिसाध्यके तथाविधहेतुकेच तादृशसाध्याभावहेत्वभावाप्रसिद्धया अव्याप्ते अपि तु प्रतियोग्यनधिकरणवृत्तित्वम् । तथाच प्रतियोग्यनधिकरणवृ त्वविशिष्टसाध्याभावाधिकरणेषु यावत्सु प्रतियोग्यनधिकरणवृत्तित्वविशि स्सन् वर्तते यो ऽभावः तत्प्रतियोगित्वमित्यर्थः; तेन "कपिसंयोगी एतद् क्षत्वा" दित्यादौ कपिसंयोगाद्यनधिकरणगुणादिवृत्तित्वोपलक्षितक संयोगाभावस्य हेत्वधिकरणे सत्त्वेपि नाव्याप्तिः; न वा "एतद्वृक्ष वान् कपिसंयोगा" दित्यादौ तथाविधकपिसंयोगाद्यभावस्य सकलसाध्य भावाधिकरणे सत्त्वेप्यतिव्याप्तिः । प्रतियोग्यनधिकरणीभूतसाध्याभाव धिकरणयावन्निष्ठ स्वप्रतियोग्यनधिकरणताकाभावप्रतियोगित्वमिति फलि ऽर्थः । प्रथमे साध्यतावच्छेदकसम्बन्धेन, चरमे हेतुतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वं बोध्यम्; तेन "अयमात्मा आत्ममहाकालान्य रत्वा" दित्यादौ व्यभिचारनिरूपकाधिकरणस्य कालस्य कालिकसम्बन्धे साध्याधिकरणत्वेपि नातिव्याप्तिः, न वा "वह्निमान् धूमा" दित्या

[दी] हेत्वभावोपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणो बोध्यः । तत्प्रतियोगित्वं च हेतुतावच्छेदकरूपेण बोध्यम् । तेन द्रव्यत्वादौ साध्ये विशिष्टसत्त्वादौ नाव्याप्तिः, न वा विशिष्टसत्तात्वादिना तादृशाभावप्रतियोगिनि सत्त्वादौ व्यभिचारिण्यतिप्रसङ्गः ।

साध्याभावाधिकरणयावदन्तर्गतकालज्ञानादिषु कालिकविषयित्वादिसम्बन्धे हेत्वभावप्रतियोग्यधिकरणतासत्त्वेप्यसम्भवो ऽव्याप्तिर्वा । इत्थंच प्रतियोगित्वे सम्बन्धविशेषावच्छिन्नत्वे न निवेशनीये, सम्बन्धान्तरावच्छिन्न प्रतियोगिताकयोः साध्याभावहेत्वभावयोः उक्तसम्बन्धेन प्रतियोगिसमानाधिकरणतया असम्भवातिव्याप्त्योरनवकाशात् ।

हेत्वभावोपी ति । अपिशब्देन साध्याभावेपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यं निवेशनीयमिति सूच्यते, तेन "विशिष्टसत्तावान् जाते" रित्यादौ हेत्वधिकरणगुणादिषु साध्याभाव प्रतियोगिन स्सत्त्वाद्दे स्सत्त्वेपि नातिव्याप्तिः । अत्र "साध्याभावोपी" त्युक्तौ अग्रिमतत्पदेन हेत्वभावपरामर्शासम्भवः; तत्र हेत्वभावपदोपदानेचाक्षराधिक्यमिति तन्नोक्तम् । **तत्प्रतियोगित्वम्** — साध्याभाववद्वृत्त्याभावप्रतियोगित्वम् । **हेतुतावच्छेदकरूपेण** — हेतुतावच्छेदकावच्छिन्न मित्यर्थः । हेत्वभावनिष्ठप्रतियोगिवैयधिकरण्यशरीरे प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशनप्रयोजनमाह - **द्रव्यत्वादा** विति । **विशिष्टसत्त्वे** ति गुणकर्मान्यत्वविशिष्टसत्तेत्यर्थः । प्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्व निवेशनस्य फलमाह - **नवे** ति । अत्रापि **द्रव्यत्वादौ साध्ये** इत्यनुषज्यते । **विशिष्टसत्तात्वादिना**- गुणकर्मान्यत्वविशिष्टसत्तात्वादिना तृतीयार्थश्च अवच्छिन्नप्रतियोगिताकत्वम्, तस्यचाभावेऽन्वयः; प्रतियोगिपदार्थैकदेशप्रतियोगित्वान्वितमवच्छिन्नत्वं वा तदर्थः । **तादृशाभावे** ति

[दी] यत्रैकव्यक्तिकं साध्यं विपक्षो वा तत्र

सकलसाध्याभाववन्निष्ठाभावेत्यर्थः । नच हेत्वभावे प्रतियोगितावच्छेद वच्छिन्नवैयधिकरण्यस्थले हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यमेव निश्यताम्, ततोपि तत्प्रयोजननिर्वाहात्; तथाच "द्रव्यं सत्त्वा" दित्यादिविशिष्टसत्ताभावस्य हेतुतावच्छेदकावच्छिन्नसमानाधिकरणतयैव अव्याप्तिवारणसम्भवात् प्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्वनिवेशमफलमिति वाच्यम्; हेतुतावच्छेदकावच्छिन्नवैयधिकरण्यनिवेशे सकसाध्याभाववन्निष्ठा या हेतुतावच्छेदकावच्छिन्नानधिकरणवृत्तित्वविशिनिरूपिताधिकरणता तन्निरूपकाभावप्रतियोगित्व मर्थस्स्यात्, तदपेक्षः सकलसाध्याभाववन्निष्ठा या हेतुतावच्छेदकावच्छिन्न यादृशप्रतियोगितवच्छेदकावच्छिन्नानधिकरणता तद्रूपस्वरूपास्मदीयफलितार्थस्यागुरुत्वात् नच ममापि सकलसाध्याभाववन्निष्ठं यद्धर्मावच्छिन्नानधिकरणत्वं तद्धवत्त्वमित्यर्थः, सचातिलघुरिति वाच्यम्; एतादृशार्थकरणे मूलोक्तं प्रतियोगितायाः व्याप्तित्वं व्याहन्येतेति मूलानुसारेण दीधितिकृता गुर्वर्थासरणात् उक्तविशेष्यविशेषणभावेन निवेशे व्यर्थविशेषणतानवकाशात्

एतल्लक्षणं दूषयित्वा उत्तरलक्षणमवतारयति— **यत्रैकव्यक्तिक**मिति । यत्रैकव्यक्तिकं साध्यं तत्राव्याप्तिरित्यन्वयः । "एतद्रूपवानेतद्रसादित्यादावव्याप्तिरित्यर्थः । अनेकाशेषत्वरूपसाकल्यस्य साध्ये असत्त्वदिति भावः । साध्ये साकल्यविशेषणं परित्यज्य कल्पान्तरानुसरणान तत्रैतद्दोषावकाश इत्यत आह- **विपक्षोवे**ति । **विपक्षः** - साध्याभावान् । अत्रा प्येकव्यक्तिक मित्यस्य विपरिणतस्यानुषङ्गः; तथाच "तद्घटभिन्नं पटत्वा" दित्यादौ साध्याभाववति तद्घटादौ साकल्याप्रसिद्धेर अव्याप्तिरित्यर्थः । सकलशब्दस्याशेषमात्रपरत्वे दोषमान्तरमाह —

साध्यवदन्यावृत्तित्वं वा; केवलान्वय्यभावात् ।

निर्धूमत्वव्याप्ये तत्त्वेन साध्ये निर्वह्नित्वादौचाव्याप्तिः, तत्र हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वादतआह— साध्यव दिति ।

निर्धूमत्वव्याप्य इति । तत्त्वेन– निर्धूमत्वव्याप्यत्वेन । तथाच "धूमत्वावच्छिन्नाभावव्याप्यवान् वह्नित्वावच्छिन्नाभावा" दित्यादावित्यर्थः । निर्धूमत्वत्वावच्छिन्ने साध्ये एकव्यक्तिकतया पूर्वदोषाक्रान्तत्वेन तद्व्याप्यसाध्यकानुसरणम् । निर्धूमत्वव्याप्यस्य ह्रदत्वादे स्तादृूप्येण साध्यतायां सद्धेतुत्वानुपपत्तिः, अत स्तत्त्वेने त्युक्तम् । हेत्वभावस्ये ति । अथ वह्न्यात्मकहेत्वभावस्य प्रत्येकं सकलसाध्याभाववन्निष्ठत्वासम्भवेपि सकल तन्निष्ठवह्न्यभावाद्भिभेदप्रतियोगिता मादायैव लक्षणं सङ्गमनीयम्, हेतु तावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशादेव व्यभिचारिणि सम्बन्धा न्तरावच्छिन्नप्रतियोगिताकहेत्वभाव मादायातिप्रसङ्गानवकाशेन हेत्वभाव प्रतियोगितायां हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वानिवेशात् ।

यत्तु वह्निमद्भेदहेतुताभिप्रायकोयं ग्रन्थः, तत्र हेतुभेदमादायापि लक्षणगमनाऽसम्भवः, भेदभेदस्यानवस्थाभयेन अधिकरणस्वरूपतया तस्य च प्रत्येकं विश्रान्ततया यावद्विपक्षवृत्तित्वासम्भवादिति; तन्न;- आकाशाभावाद्यधिकरणकभेदभेदस्याकाशाद्यभावास्वरूपतया तस्य च यावद्विपक्षवृत्तित्वेन तमादायैव लक्षणगमनसम्भवात् । नचेदृशरीत्या आकाशाभावमादाय भेदहेतुकव्यभिचारिण्यतिव्याप्तिप्रसक्त्या हेत्वभावत्वेन सकलसाध्याभावाधिकरणवृत्तित्वं विवक्षणीयम्, तथासत्यधिकरणस्वरूपाभावस्य स्वस्मिन्नेव तदभावत्वेन वृत्तिरिति नातिव्याप्त्यवकाशः, एवञ्चाकाशाभावमादाय नोक्ताव्याप्तिपरिहारसम्भवइति वाच्यम्; उक्तस्थले आकाशाभावस्य

हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यविरहादेवातिव्याप्तिवारण
म्भवेन एतादृशविवक्षाया निष्प्रयोजनकत्वात्; वह्निमद्भेदहेतुकस्थले
साध्याभावाधिकरणस्य हेतुरूपप्रतियोग्यनधिकरणत्वेन आकाशाभाव
हेतुभेदस्य प्रतियोगिव्यधिकरणत्वेन अव्याप्तिवारणसम्भवादिति चेत्;

अत्र केचित्;—यत्र वह्न्यभावान्यत्वविशिष्टनिर्धूमत्वव्याप्यं सा
वह्न्यभावान्यत्वविशिष्टवह्न्यभावो हेतुः, तत्र वह्न्यभावस्यापि स
साध्याभाववदन्तर्गततया तत्र वह्न्यभावभेदासत्त्वेन समादाय लक्ष
गमनासम्भवात्। न च तादृशविशिष्टहेतुकस्थले हेतुभेदस्य स
साध्याभाववन्निष्ठत्वासम्भवेपि अखण्डस्य विशिष्टात्यन्ताभावस्य तथ
मादायैव लक्षणं सङ्गमनीयमिति वाच्यम्;— प्राचीनमते विशिष्टाभाव
विशेष्याभावविशेषणाभावाभ्या मनतिरिक्तत्वेन तादृशविशिष्टाभावस्य वह्
भावत्ववह्न्युभयरूपत्वेन सकलसाध्याभाववन्निष्ठत्वासम्भवात्। अथैवम
विषयितादिसम्बन्धावच्छिन्नप्रतियोगिताकस्य वह्न्यभावात्यन्ताभावस्याख
तया सकलधूमवन्निष्ठतया तमादायैव लक्षणं सङ्गमनीयमिति चेन्न;-
वृत्त्यनियामकतया विषयितादिसम्बन्धाना मत्यन्ताभावप्रतियोगितानवच्
दकत्वात्। संयोगादिरूपव्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकवह्न्यभ
द्यभावस्याखण्डस्य सकलधूमवन्निष्ठत्वेपि तदभावप्रतियोगिता न हेतु
वच्छेदकीभूतवह्न्यभावत्वावच्छिन्ना, तत्र लाघवेनाभावत्वस्यैवावच्छे
त्वादिति न तमादायापि लक्षणसङ्गतिः। नच गुरुधर्मावच्छिन्नहे
स्थले लक्षणसङ्गमनाय पारिभाषिकमेवावच्छेदकत्वं हेतुतावच्छे
निवेश्यम्, तथाच वह्न्यभावत्वादेरपि तादृशावच्छेदकत्वमक्षतमे
वाच्यम्;– एतल्लक्षणस्य परित्याज्यतया निखिलदोषोद्धारानावश्यकत
पारिभाषिकावच्छेदकत्वं न निविष्टमित्यभिप्रायेणैव तद्दोषदानादिति वदन्

तदसत्;—

तथासत्यपि सकलसाध्याभाववन्निष्ठकालिकसम्बन्धावच्छिन्न प्रतियोगिताकवह्न्यभावाभावमादाय लक्षणसमन्वयसम्भवात्। नच जन्यमात्रस्य कालोपाधितानये साध्याभाववति पर्वतादौ कालिकसम्बन्धेन वह्न्यभावसत्वात् तत्र तत्सम्बन्धेन तदभावो न वर्ततएवेति वाच्यम्; कालिकसम्बन्धेन तत्र वह्न्यभावसत्त्वेपि प्रतियोग्यनधिकरणीभूतवह्निमद्देशा वच्छेदेन तत्र तत्सम्बन्धावच्छिन्नप्रतियोगिताकतदभावस्यापि सत्त्वात्; एवं विशिष्टाभावस्य विशेष्याभावविशेषणाभावाभ्या मनतिरिक्तत्वे "द्रव्यं विशिष्टसत्वा" दित्यादावेवाव्याप्तिसम्भवे तदुपेक्षायाः निर्बीजत्वाच्च। एतेन "विशेषणताविशेषसम्बन्धेन वृत्तिघटितसामानाधिकरण्यसम्बन्धा-वच्छिन्नप्रतियोगिताकधूमाभावव्याप्यवान् तादृशसामानाधिकरण्यसम्बन्धा-वच्छिन्नप्रतियोगिताकवह्न्यभावा" दित्येतत्परम्; तत्र धूमसामानाधिकरण्य रूपस्य सकलसाध्याभावस्याधिकरणं हेतुरपि, तस्य धूमाधिकरणे सत्त्वात् तत्र च हेतुभेदमादायापि न लक्षणसमन्वयसम्भवः; अत्यन्ताभावमादाय तदसम्भवो दर्शितरीत्या ऽवसेयः। इत्थञ्च विशिष्टाभावस्य विशेष्या भावविशेषणाभावाभ्या मतिरिक्तत्वेपि न दोषासङ्गतिरिति परास्तम्; तत्रापि कालिकसम्बन्धावच्छिन्नाभावमादाय दोषवारणसम्भवात्। तस्मात् प्रतियोगितावच्छेदकसम्बन्धेनैव प्रयियोगिवैयधिकरण्यं निविष्टम्, प्रति योगिता च हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वेन निविष्टेत्यभिप्रायेणैवैतद्दोष दानम्। हेतुतावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यप्रवेशेत्वग्रिमलक्ष-णापेक्षया गौरवमेवैतल्लक्षणपरित्यागे बीजं बोध्यम्।

एतेन सकलशब्दस्य व्यापकत्वार्थकतया साध्याभावव्यापकीभूता भावप्रतियोगित्वमेवैतल्लक्षणनिष्कृष्टार्थः, "धूमवान् वह्ने" रित्यादौ प्रमेय त्वादिना वह्न्यभावस्य साध्याभावव्यापकत्वेपि न क्षतिः, यद्रूपावच्छिन्न

प्रतियोगिताकाभावत्वं साध्याभावव्यापकतावच्छेदकं तद्रूपवत्त्वस्यैव लक्षणत्वात्; एवंच हेत्वभावे प्रतियोगिवैयधिकरण्यं न निवेश्यते, व्यापकतालक्षणे प्रतियोगिवैयधिकरण्यानिवेशेनाव्याप्यवृत्तिहेतुकव्यभिचारिणि हेत्वभावस्य साध्याभाववन्निष्ठहेतुरूपाभावप्रतियोगितया व्यापकत्वाभावेनातिव्याप्तिविरहात् । व्यापकताशरीरे च हेतुतावच्छेदकसम्बन्धेन साध्याभाववन्निष्ठत्व मभावे निवेश्यम्, तेन वह्न्याद्यभाववति कालिकादिसम्बन्धेन धूमाद्यात्मकाभावस्य धूमावपि धूमाभावादे र्नसाध्याभावव्यापकताक्षतिः । "सत्तावान् जाते" रित्यादौ साध्याभाववति हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिध्द्या अव्याप्तिस्तु लक्षणपञ्चकएव दोषः । अस्तु वा हेतुतावच्छेदकसम्बन्धेन हेतुमत्ताज्ञानंप्रति यादृशसम्बन्धेन हेत्वभाववत्ताग्रहः प्रतिबन्धकः तादृशसम्बन्धेन स्वावच्छिन्नाधिकरणभिन्नसाध्याभावाधिकरणकं यद्यत्स्वं तत्तद्भिन्नत्वमेव साध्याभावव्यापकतावच्छेदकत्वम्, इत्थंच "सत्तावान् जाते" रित्यादावेतादृशं स्वं जातित्वाभावत्वादिकमेव, तद्भिन्नञ्च जात्यभावत्वमिति लक्षणसमन्वयः । इत्थञ्च "एतद्वृक्षत्ववान् कपिसंयोगा" दित्यादौ कपिसंयोगाभावत्वावच्छिन्नानधिकरणत्वाप्रसिध्द्या कपिसंयोगाभावत्वं नैतादृशं स्वमिति कपिसंयोगाभावत्वस्य साध्याभावव्यापकतावच्छेदकत्वादतिव्याप्तिवारणाय हेत्वभावे प्रतियोगिवैयधिकरण्यं देयमेव, न देयमेववा ऽधिकरणत्वाभावस्यैव अधिकरणभिन्नत्वस्थाने निवेशनीयत्वात् कपिसंयोगाभावादेरिव तदधिकरणताया अप्यव्याप्यवृत्तितया तदभावस्य साध्याभाववति सत्त्वेनातिव्याप्त्यनवकाशात्; अधिकरणत्वाभावादिश्च भावप्रतियोगिकतया अतिरिक्तएवेति विशेषणताविशेषेणैव तद्वृत्त्वं साध्याभाववति विशेषणीयमिति । एवञ्च "निर्धूमत्वव्याप्यवान् निर्वह्नित्वा" दित्यादौ हेत्वभावस्य वह्न्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वेपि हेत्वभावत्वेन तेषां साध्याभावव्यापकत्वान्नाव्याप्तिरिति पूर्वपक्षो-

[दी] अत्रान्योन्याभत्वस्य साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यम् ; न हि भवति "नीलो घटो घटादन्य" इति ।

प्यकिञ्चित्करः, यत्र यावतां साध्याभाववतां सम्भव स्तत्र प्रातिस्विकरूपेण तत्तदधिकरणवृत्तित्वमेव हेत्वभावविशेषणतया लक्षणघटकम् , न तु साध्याभावव्यापकत्वमित्यभिप्रायेणैव एतद्दोषदानात् , प्रकारान्तरानुसारेण परिष्कारे सकललक्षणानामेव परिष्कारसम्भवादितिकृतं पल्लवितेन ।

साध्यवद्व्यक्तिविशेषभेदमादायाव्याप्तिं परिहरति— **अत्रे** ति । **साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्व** मिति । साध्यतावच्छेदकविशिष्टसाध्यवत्त्वपर्याप्तप्रतियोगितावच्छेदकताकत्वमित्यर्थः । तेन "वह्निमान् धूमा" दित्यादौ तत्तद्वह्निमत्त्वावच्छिन्नप्रतियोगिताकभेदमादाय न दोषः, तादृशभेदप्रतियोगितावच्छेदकतायाः तत्त्वविशिष्टवह्निमत्त्वएव पर्याप्तत्वात् । **व्युत्पत्तिबललभ्यम्**— अन्यादिपदसमभिव्याहारलभ्यम् । नञ्पदसमभिव्याहारज्ञानस्येव तादृशपदसमभिव्याहारज्ञानस्याप्यन्वयितावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावशाब्दबुद्धित्वावच्छिन्नंप्रत्येव जनकत्वादिति भावः। **व्युत्पत्तिबललभ्य** मित्यनेन यथाश्रुतलक्षणवाक्यार्थएवायमिति सूचितम् । तादृशसमभिव्याहारस्थले तत्प्रतियोगिकाभावमात्रबोधे अतिप्रसङ्गं सूचयति— **नहि भवती** ति । "प्रामाणिकव्यवहार" इति शेषः । तथाच अन्वयिप्रतियोगिकाभावमात्रबोधे नीलघटेपि पीतघटादिभेदसत्त्वेन तादृशव्यवहारोपि स्यादिति भावः । एवं "द्रव्यं न घट "इत्याद्यप्रयोगादनुयोगितावच्छेदकावच्छेदेनैव अन्योन्याभावादि रन्यादिपदेन प्रत्याय्यते, अनुयोगितावच्छेदकश्च प्रतियोग्यवृत्तिरेव धर्मइति प्रकाशकृदङ्गीकृत *व्युत्पत्तिविरोधात् "घटो घटादन्य" इति प्रयोगवारणसम्भवात् **नील** इति ।

"घटादन्य"इत्यादौ प्राचीनमते पञ्चम्याः प्रतियोगित्वमर्थः,तत्र च प्रकृत्यर्थस्य घटत्वादिविशिष्टस्य घटत्वाद्यवच्छिन्नत्वविशिष्टाधेयतासम्बन्धेनान्वयः

---

* "व्युत्पत्त्यनुरोधात्" इति पाठान्तरम् ।

अथवा केवलमाधेयत्वमेव घटस्य सम्बन्धः, धर्मिपारतन्त्र्येण घटत्वादे रप्यवच्छिन्नत्वसम्बन्धेन तत्रान्वयोपगमात् ; एकत्र विशेषणत्वेनोपस्थितस्या प्यन्यत्र पारतन्त्र्येणान्वयस्य व्युत्पत्तिसिद्धत्वात् , प्रतियोगित्वस्य च व्युत्पत्तिवैचित्र्येणान्यपदार्थैकदेशभेदे निरूपकतासम्बन्धेनान्वयः । " घटा- न्य " इत्यादौ निरूपकतासम्बन्धेन घटत्वाद्यवच्छिन्नप्रतियोगिताविशिष्टो लक्षणया घटादिपदार्थः, तत्पुरुषे पूर्वपदस्य तत्तद्विभक्त्यन्तार्थविशिष्ट लाक्षणिकत्वात् ; तादृशघटादिपदार्थस्यचाभेदसम्बन्धेन भेदे ऽन्वयः । नवीनमतेच " घटादन्य " इत्यादौ अनुयोगिता पञ्चम्यर्थः, तत्र प्रकृत्य र्थस्य घटत्वादिविशिष्टस्य स्ववृत्तिघटत्वाद्यवच्छिन्ननिरूपकताकत्वसम्बन्धे- नान्वयः; अनुयोगितायाश्च आश्रयतासम्बन्धेन भेदे ऽन्वयः, समासस्थले च घटत्वाद्यवच्छिन्ननिरूपितानुयोगिताविशिष्टे पूर्वपदस्य लक्षणा, तस्य- चाभेदसम्बन्धेन भेदे ऽन्वयः ।

अथैवं **साध्यवदन्यावृत्तित्व** मित्येतादृशलक्षणवाक्यादभेदसम्ब- न्धेन तादृशप्रतियोगिताविशिष्टविशेषितः तादृशानुयोगिताविशिष्टविशेषितो वा यो भेदः तद्वदवृत्तित्वमेव प्रतीयते, तथाचानुमित्यौपयिकव्याप्तिस्व- रूपजिज्ञासायां तादृशलक्षणाभिधाने अर्थान्तरप्रसङ्गः, तादृशप्रतियोगिता सम्बन्धेन तादृशानुयोगितासम्बन्धेन वा साध्यवद्विशेषितभेदवदवृत्तिता ज्ञानस्यैव लाघवेन अनुमितिहेतुत्वादिति चेन्न;– यादृशव्याप्तिज्ञान मनु मितिहेतु स्तस्यामेवास्य तात्पर्यात् , तस्या श्शाब्दबोधाविषयत्वेपि तन्मू- लकोदीच्यतादृशव्याप्तिविषयकमानसोपनीतभानस्यैव तादृशतात्पर्यनिर्वाह्य- त्वात् , तादृशशाब्दबोधस्यापि कथञ्चिदुपपादयितुं शक्यत्वाच्च । " नीलो घटः कम्बुग्रीवादिमदन्य " इत्यादिवाक्यस्याप्रामाण्यात् " पटः कम्बुग्री- वादिमदन्य " इत्यादिवाक्यस्य प्रामाण्यादन्वयितावच्छेदकनिरूपितं पारि भाषिकमवच्छिन्नत्वं प्रतियोगितायां भासतइत्युपेयम् , अतः **साध्यवदन्य**

इत्यादौ मतुबन्तप्रतिपाद्यतावच्छेदकस्य साध्यसम्बन्धस्य साध्यापेक्षया गुरुतया अनवच्छेदकत्वेपि नोक्तलक्षणवाक्यार्थाप्रसिद्धिः ।

पारिभाषिकं तदवच्छिन्नत्वंच तद्विशिष्टसम्बन्धिनिष्ठाभावीया या या प्रतियोगिता तदवच्छेदकत्वाभावकूटवदवच्छिन्नत्वम् ; एतादृशावच्छिन्नत्वस्य सम्बन्धतया निवेशात् प्रातिस्विकरूपेण तत्तत्प्रतियोगिताव्यक्तीनां दुर्ज्ञेयत्वेपि न क्षतिः; सम्बन्धज्ञानस्य विशिष्टबुद्धावनपेक्षितत्वात् । अनुमितिं प्रति च साध्यावच्छिन्नप्रतियोगितावगाहिज्ञानमेव कारणं कल्प्यते लाघवात्, न तु साध्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वावगाहिज्ञानमिति अनुमित्यौपयिकव्याप्तिशरीरे तादृश्येव प्रतियोगिता निवेश्यते । " कम्बुग्रीवादिमद्वान् घटात् " इत्यादौ विशेषदर्शिना मनुमितेः प्रामाणिकत्वे निरुक्तपारिभाषिकावच्छिन्नत्वमेव अनुमित्यौपयिकव्याप्तिघटकम्, तादृशगुरुधर्मावच्छिन्नसाध्यकानुमानस्य केवलान्वयिसाध्यकसमशीलतावादिनस्तु स्वरूपसम्बन्धरूपावच्छिन्नत्वमेव व्याप्तिशरीरे निवेशयन्तीति समासः ॥ .... *

इति पञ्चलक्षणी समाप्ता ।

अथ सिंहव्याघ्रलक्षणे ।

नापि साध्यसामानाधिकरण्यानधिकरणत्वम्,

नापी ति । साध्यमसमानाधिकरणं यस्य, यदधिकरणानधिकरणं साध्यं तत्त्वम् साध्यनिष्ठासामानाधिकरण्यप्रतियोगित्वम्,

साध्यासामानाधिकरण्यानधिकरणत्वलक्षणे यदि तदाधिकरणावृत्ति रूपासामानाधिकरण्यं निवेश्यते, तदा "द्रव्यं सत्त्वा" दित्यादावतिव्याप्ति सत्तायाः द्रव्यत्वाधिकरणवृत्तितया तादृशासामानाधिकरण्यानधिकरणत्वात तदनधिकरणवृत्तित्वस्यासामानाधिकरण्यपदार्थत्वे अनन्तरवक्ष्यमाणलक्ष भेदः इत्यतो व्याचष्टे- **साध्य** मिति । **असमानाधिकरणं** य त्यत्र असमानाधिकरणपदस्य स्वानधिकरणाधिकरणार्थकत्वे "द्रव्यं सत्त्व दित्यादावतिव्याप्तिः, द्रव्यत्वादे स्सत्ताद्यनधिकरणाधिकरणकत्वविरहेण त्पदेन सत्त्वादेरुपादानासम्भवात् । "सत्तावान् द्रव्यत्वा" दित्याद व्याप्तिश्च, सत्त्वादेर्द्रव्यत्वाद्यनधिकरणाधिकरणकत्वात् । अतः तदधिकर नधिकरणपरतया तत्पदं व्याचष्टे — **यदधिकरणे** ति । यदधिकर नधिकरणं साध्यं तत्त्वानधिकरणत्वस्य व्याप्तित्वे व्याप्तेर्विशिष्टैव रूपतानुपपत्त्या विशिष्टपरामर्शस्यानुमितिहेतुत्वानिर्वाहः, यत्त्वतत्त्वा गमेन तत्त्वाधिकरणत्वाभावकूटस्य निवेशनीयतया गौरवञ्चेत्याशयेन य तत्त्वाघटितं साध्यासामानाधिकरण्यपदार्थमाह— **साध्यनिष्ठे** ति । सा निष्ठं यदसामानाधिकरण्यं स्वाधिकरणीभूतयत्किंचिद्व्यक्तिवृत्तित्वाभावः त्प्रतियोगित्वञ्च तत्प्रतियोगिकोटिनिविष्टाधिकरणवृत्तित्वम् ; साध्यनि भावीयाधेयत्वनिष्ठप्रतियोगितायां निरूपितत्वसम्बन्धेन यदवच्छेदकं वृत्तित्वमिति यावत् । "वह्निमान् धूमा" दित्यादौ साध्यनिष्ठाभावो ह धेयत्वाभावः, तदीयप्रतियोगितायामुक्तसम्बन्धेन अवच्छेदको ह्रदा तद्वृत्तित्वानधिकरणत्वं धूमादाविति लक्षणसमन्वयः ।

[दी]साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमितियावत् ; तदनधिकरणत्वमित्यर्थः । साध्यवद्भिन्नस्य च साध्यनिष्ठाधेयत्वानिरूपकत्वा-

---

अत्र साध्यनिष्ठाभावप्रतियोग्याधेयत्वं साध्यतावच्छेदकसम्बन्धावच्छिन्नं ग्राह्यम् , अन्यथा " वह्निमान् धूमा " दित्यादौ पर्वतादिसमवेतत्वाद्यभावमादायाऽनुपपत्तेः । तथाच "सत्तावान् समवायित्वा" दित्यादौ साध्यनिष्ठाभावीयसमवेतत्वनिष्ठप्रतियोगितावच्छेदकीभूताधिकरणाप्रसिद्ध्या - अव्याप्तिः, " वह्निमान् धूमा " दित्यादावपि धूमादेरयोगोळकीयवह्न्यादिनिष्ठपर्वतादिवृत्तित्वाभावप्रतियोगितावच्छेदकपर्वतादिवृत्तित्वादव्याप्तिश्च । साध्यतावच्छेदकव्यापकीभूताभावनिवेशे च गौरवमित्याशयेन फलितार्थमाह— **साध्यनिष्ठाधेयत्वे** ति । अनिरूपकत्वमिह साध्यनिष्ठाधेयतात्वावच्छेदेन विवक्षणीयम् , तेन " वह्निमान् धूमा दित्यादौ महानसादेः पर्वतीयवह्निनिष्ठाधेयत्वानिरूपकत्वेपि नाव्याप्तिः ।

एवं साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनाऽऽधेयता निवेशनीया, तेन " आयमात्मा आत्ममहाकालान्यतरत्वा " दित्यादौ कालस्य कालिकसम्बन्धावच्छिन्नात्मत्वनिष्ठाधेयतानिरूपकत्वेपि नातिव्याप्तिः । तादृशाऽऽधेयत्वानिरूपके **त्यत्राधिकरणत्वमविवक्षितम्**, तदनिरूपकत्वमात्रं निविष्टम् । प्रथमतो " द्रव्यं सत्त्वा " दित्यादावतिव्याप्तिराशङ्कितत्तया व्यभिचारिसामान्यएवातिव्याप्तिमुद्धरति— **साध्यवद्भिन्नस्ये** ति । व्यभिचारनिरूपकाधिकरणस्येत्यर्थः । अत्राधिकरणवृत्तित्वं हेतुतावच्छेदकसम्बन्धेन वाच्यम् , अन्यथा " वह्निमान् धूमा " दित्यादौ साध्यनिष्ठाधेयत्वानिरूपकस्वावयवादौ धूमादेः स्वसमवायेन वृत्तेरव्याप्त्यापत्तेः । इत्थञ्च " सत्तावान् द्रव्यत्वा " दित्यादावव्याप्तिः, साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे सामान्यादौ हेतुतावच्छेदकसम्बन्धात्मकसमवायादिना वृत्तेरप्रसिद्धेः

[दी] तद्वृत्तौ नातिप्रसङ्गः । साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्व व्यापकाभाव प्रतियोग्यधिकरणतासामान्यकत्वमिति निष्कर्षः ।

एवं " द्रव्यं विशिष्टसत्त्वा " दित्यादावपि विशिष्टसत्तादे स्सत्ताद्यन[ति]रिक्ततया साध्यनिष्ठाधेयत्वानिरूपकाधिकरणगुणादिवृत्तित्वानधिकरणत्वा सम्भवात् अव्याप्तिरित्यतो निष्कृष्टार्थमाह— साध्यनिष्ठे ति। अत्रापि पू[र्व] दोषवारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनाऽऽधेयत्वं निवेशनीयम् एवमधिकरणत्वमप्यविवक्षितम् , तादृशाधेयत्वनिरूपकत्वव्यापकतैवाऽभा[व] निवेशनीया; तादृशाधेयत्वानिरूपकवृत्तित्वमात्रनिवेशे " धूमवान् वह्ने " रित्यादौ वह्न्यधिकरणत्वसामान्याभावस्य धूमनिष्ठाधेयत्वानिरूपकह्रदादि वृत्तित्वादतिव्याप्तिरित्यतो व्यापकतानिवेशः । व्यापकत्वञ्च तद्वन्निष्ठ[ा]न्योन्याभावप्रतियोगितावच्छेदकत्वम् , न तु तद्वन्निष्ठात्यन्ताभावप्रतियोगि त्वम् , सर्वस्यैव तथाविधद्वित्वावच्छिन्नाभावप्रतियोगितया तदप्रसिद्धेः न वा तद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम् , तादृशाभा[व] प्रतियोगितानवच्छेदकीभूताभावत्वादिक मादाय वह्न्यधिकरणत्वसामान्या भावस्यापि धूमानधिकरणत्वव्यापकतया ऽतिव्याप्त्यापत्तेः । अनवच्छेद कत्वञ्चावच्छेदकतापर्याप्त्यनधिकरणत्वम्; अत उभयवद्भेदमादाय [न] दोषः । अथवा यदधिकरणतासामान्याभावत्वं साध्यनिष्ठाधेयत्वानिरूप[क] वृत्त्यत्यन्ताभावप्रतियोगितावच्छेदकं तत्त्वमेव समुदायार्थः; अतोऽभा[व] त्वादिना व्यापकत्वमादाय न दोषः ।

अधिकरणता च हेतुतावच्छेदकसम्बन्धावच्छिन्ना ग्राह्या; ते[न] " वह्निमान् धूमा " दित्यादौ वह्न्यनधिकरणधूमावयवादौ धूमाधिक रणत्वसामान्याभावासत्त्वेपि न क्षतिः । " धूमवान् वह्ने " रित्याद[ौ] यत्किंचिद्वह्न्यधिकरणत्वाभावस्य धूमानधिकरणत्वव्यापकतया अतिव्या[प्ति]

साध्यवैयधिकरण्यानधिकरणत्वं वा,

तेन " सत्तावान् द्रव्यत्वा " दित्यादौ न दोषः । साध्यवैयधिकरण्यम्- साध्यवद्भिन्नाधिकरणत्वम् ।

वारणाय सामान्यपदम् ; तथाच तादृशाधेयत्वानिरूपकत्वव्यापकाभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नाधिकरणतात्वं यद्रूपावच्छिन्नाधिकरणतात्वावच्छिन्नाभावत्वं वा तादृशाधेयत्वानिरूपकत्वव्यापकतावच्छेदकं तद्रूपवत्त्वमिति फलितार्थः । तेन धूमानाधिकरणत्वव्यापकीभूतवह्न्यधिकरणत्वधूमाधिकरणत्वोभयसामान्याभावप्रतियोगितायाः वह्न्यधिकरणत्वसामान्यनिष्ठत्वेपि नातिव्याप्तिः । यदधिकरणतामात्रनिवेशे " द्रव्यं विशिष्टसत्त्वा " दित्यादावव्याप्तिः, द्रव्यत्वानधिकरणगुणादौ हेत्वधिकरणतात्वावच्छिन्नाभावासत्त्वात् ; अतो यद्रूपावच्छिन्ने ति । हेत्वभावस्य व्यापकतानिवेशे व्यापकताशरीरे हेतुतावच्छेदकसम्बन्धेन तद्वन्निष्ठत्वं निवेश्यम्, अन्यथा " वह्निमान् धूमा " दित्यादौ साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे ह्रदादौ धूमात्मकाभावस्य कालिकसम्बन्धेन वृत्ते रव्याप्त्यापत्तेः, तथासति " सत्तावान् द्रव्यत्वा " दित्यादावव्याप्तिः, साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धेः ; अतो हेत्वधिकरणत्वाभावस्य व्यापकताघटितमेव लक्षणं कृतम् ; तथाचाधिकरणतायाः विशेषणताविशेषेण वृत्तिमत्तया तेन सम्बन्धेन तद्वन्निष्ठत्वं निवेश्यम्, अतो न दोषः ।

पूर्वकल्पपरित्यागे बीजमाह— तेने ति । न दोष इति । सामान्यादौ हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्धावपि तत्सम्बन्धावच्छिन्नायाः द्रव्यत्वाधिकरणतायाः द्रव्ये प्रसिद्धायाः अभावस्य साध्यानधिकरणत्वव्यापकत्वादिति भावः ।

तदुभयमपि साध्यानधिकरणानधिकरणत्वं

चरमाधिकरणत्वांशस्या ऽनतिप्रयोजनकतया तमपहाय द्वयमेकोक्त्या ऽनूद्य दूषयति-- **तदुभयमपी** ति । **साध्ये** त्यादेः साध्यं यदधिकरणानाधिकरणं तत्त्वाभावः,

---

साध्यवैयधिकरण्यस्य निरुक्तार्थकत्वे पौनरुक्त्यमतस्तद्व्याचष्टे—**साध्ये** ति । ननु मूले **तदुभयमपि साध्यानधिकरणानधिकरणत्व** मित्यनेनोक्तलक्षणद्वयानुवादो ऽसङ्गतः, असामानाधिकरण्यवैयधिकरण्ययो रधिकरणताद्वयघटितत्वेन तादृशलक्षणयो रधिकरणतात्रयघटितत्वानुवादेच्च अधिकरणताद्वयमात्रस्य निवेशादित्यतो मूलं सङ्गमयति— **चरमाधिकरणत्वांशस्ये** ति । **अनतिप्रयोजनकतये** ति । अनधिकरणत्वस्याधिकरणत्वाभावरूपतया तद्घटकाधिकरणत्वांशं परित्यज्य साध्यासामानाधिकरण्याभावसाध्यवैयधिकरण्याभावनिवेशेनैवोपपत्तेरिति भावः । असामानाधिकरण्याद्यधिकरणत्वाभावस्याखण्डस्यासामानाधिकरण्याद्यभावाघटिततया न वैयर्थ्यमि त्यनतिप्रयोजनकतये त्युक्तम् । **तदपहाय** – चरमाधिकरणत्वांशं परित्यज्य । **द्वयम्**– साध्यासामानाधिकरण्याभाव साध्यवैयधिकरण्याभावरूपनिष्कृष्टलक्षणार्थद्वयम् । **साध्यानधिकरणानधिकरणत्व** मित्यनेन "सत्तावान् द्रव्यत्वा" दित्यादावव्याप्तिवारणाय विवक्षितस्य प्रथमलक्षणनिष्कृष्टार्थस्य कथञ्चिदपि प्रतिपादनासम्भवात्तदनुवादकता ऽनुपपन्नेति यथाश्रुतार्थानुवादपरतया सङ्गमयितु मनुवदनीयलक्षणार्थद्वयमाह-- **साध्येत्यादे** रिति । लक्षणद्वयस्य "क्रमेणे" ति शेषः । **तत्त्वाभाव** इत्यन्तेन प्रथमलक्षणार्थकथनम् ; एवञ्च साध्याधिकरणानधिकरणशब्देन साध्यं यदधिकरणानधिकरणं तद्बोध्यते; तदुत्तरत्व प्रत्ययेन तत्त्वं साध्यपदोत्तरसान्निविष्टनञा तदभावः प्रत्याय्यतइति प्रथमलक्षणार्थबोधकत्वं **साध्यानधिकरणानधिकरणत्व** मित्यस्य । नच

साध्याधिकरणानधिकरणत्वपदेन नञ्समासे सत्येव तदर्थाभावो नञा प्रत्याययितुं शक्यते, तथाच साध्यपदोत्तर नञ्निपातोऽसम्भवी, समस्यमानपूर्वनिपतितस्यैव नञस्साधुत्वात्; अन्यथा "अचित्रगु" रित्यादौ चित्रादिपदोत्तरमपि नञ्निपातापत्तेरिति वाच्यम्;— ससम्बन्धिकार्थबोधकोत्तरपदघटितसमुदायेन समं नञ्समासस्थले नञो मध्यनिवेशस्यापि साधुत्वसम्पादकत्वात्; अन्यथा " घटानधिकरणत्वं साध्याभाववदवृत्तित्व " मित्यादौ घटाधिकरणत्वाभावसाध्याभाववदवृत्तित्वाभावप्रत्ययानुपपत्तेः । न हि तत्रानधिकरणत्वादिपदानां घटादिपदैस्समासे तादृशार्थप्रतीतिरुपपद्यते, अनधिकरणत्वपदादिजन्यप्रतीतिविशेष्यीभूताभावेन सममेव घटादिसंसर्गभानात्, समस्यमानपदप्रतिपाद्यतावच्छेदककोटिनिविष्टेनापरपदार्थान्वये राजपुरुषादन्यइत्यर्थे " राजा पुरुष " इत्यादिसमासापत्तेः । एवं नञा अन्वयितावच्छेदकावच्छिन्नाभावस्यैव बोधनादधिकरणसामान्यभेदवानेवानधिकरणपदार्थस्स्यात्, तस्यचाप्रसिध्द्या नञ्पदाधिकरणपदयोः प्राथमिकसमासासम्भवाच्चेति ।

साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वाभावरूपः प्रथमलक्षणस्य निष्कृष्टयथाश्रुतार्थोऽपि साध्यानधिकरणानधिकरणत्वशब्देन प्रतिपाद्यते । तथाहि— आधेयतानिरूपकार्थकचरमाधिकरणपदघटितेन अधिकरणानधिकरणपदेन अधिकरणमनधिकरणं आधेयत्वानिरूपकंयस्येति व्युत्पत्त्या अधिकरणनिष्ठभेदप्रतियोगितावच्छेदकनिरूपकताकाधेयतावत्त्वेनाऽन्यपदार्थो बोध्यते ; बहुव्रीहौ विग्रहवाक्याद्यादृशविशेषणविशेष्यभावापन्नस्य बोधः तद्विपरीतविशेषणविशेष्यभावापन्नस्य समासेन प्रत्ययात् । " चित्रा गौर्यस्ये " ति विग्रहवाक्यात् यत्पदार्थसम्बन्धित्वेन चित्रगोः " चित्रगु " रित्यतः चित्रगोनिष्ठसम्बन्धप्रतियोगित्वेन यत्पदार्थस्य बोधात्, प्रकृतस्थले च विग्रहवाक्यादन्यपदार्थनिष्ठाधेयतानिरूपकत्वावच्छिन्नभेद-

तच्च तत्र यत्किञ्चित्साध्यानधिकरणाधि करणे धूमेऽप्रसिद्धम् ॥

साध्यस्य यदनधिकरणं तद्वृत्तित्वाभावश्चार्थः । तत्र– केवला न्वयिनि । साध्यनिष्ठाधेयत्वानिरूपकाधिकरणाऽप्रसिध्द्या

वत्त्वेनाधिकरणप्रतीतेः । एवञ्च साध्यं यस्याधिकरणानधिकरणं यदधि करणनिष्ठभेदप्रतियोगितावच्छेदकीभूतनिरूपकताकाधेयतावदिति व्युत्पत्त्या साध्यनिष्ठाधेयतानिरूपकत्वावच्छिन्नभेदवदधिकरणवृत्तित्वं साध्याधिकरणा नधिकरणत्वशब्देन प्रत्याय्यते, तदभावस्साध्यपदोत्तरनञ्पदघटिततद्वा- क्येनेति ।

द्वितीयलक्षणार्थमाह– साध्यस्ये ति । तथाच साध्यानधिकरणमधिकरणं आधेयतानिरूपकं यस्येति व्युत्पत्त्या साध्यानधिकरणाधिकरणत्वशब्देन साध्यानधिकरणवृत्तित्वं प्रत्याय्यते, तदभावो द्वितीयनञेति उक्तशब्दस्य एतदर्थानुवादकतेति भावः ।

पूरणसंवलितं तत्रे ति ग्रन्थं व्याचष्टे— तत्रे त्यादिना । मूले केवलान्वयिनि "वह्निमान् धूमा" दित्यादौचाव्याप्तौ हेत्वकथनात् प्रथम लक्षणे केवलान्वयिन्यव्याप्तिहेतुं पूरयति— साध्ये त्यादिना अप्रसिध्द्ये त्यन्तेन । साध्यनिष्ठाधेयतानिरूपकसामान्यभेदनिवेशाभिप्रायेण इयमप्र सिद्धि रभिहिता, यत्किञ्चिन्निरूपकभेदनिवेशे च तादृशभेदवदधिकरणे हेतोर्वृत्तेःरव्याप्तिर्बोध्या । वक्ष्यमाणक्रमेण नानाव्यक्तिसाध्यकहेत्वन्तरेष्व व्याप्तिसत्त्वात् धूममात्रे तत्कथनं मूलकृतो न्यूनतासम्पादकम् , अतो

[र्दी]नानाव्यक्तिसाध्यकेचैकसाध्यव्यक्तिनिष्ठाधेयत्वानिरूपकत्वं साधनाधिकरणव्यक्त्यन्तरस्येत्यव्याप्तिः, क्वचिद्व्यभिचारिण्यतिव्याप्तिश्चाऽऽद्ये; द्वितीये च साध्यवैयधिकरण्ये यदि साध्यवत्त्वावच्छिन्नप्रतियोगिताको भेदो विवक्षितः, तदा

धूम इत्यस्य उपलक्षणत्वाभिप्रायेण पाठमधृत्वैव व्याचष्टे— **नानाव्यक्तिके** ति । अत्र च यथासम्भव मव्याप्तिर्बोध्या; तेन " एतद्वृत्तियावद्धर्मवानेतत्त्वा " दित्यादौ वक्ष्यमाणरीत्या ऽव्याप्तिविरहेपि न क्षतिः । अतएवा ऽग्रे **नानाधिकरणके सर्वत्रे** ति वक्ष्यति । यद्वा **नानाव्यक्तिसाध्यक** इत्यस्य मिथो व्यधिकरणद्वयवृत्तिसाध्यतावच्छेदकक इत्यर्थः । अत्राव्याप्तौ हेतुं पूरयति— **एके** त्यादिना **इती** त्यन्तेन । अनया रीत्या अव्याप्तिश्च यत्किञ्चित्साध्यनिष्ठाधेयत्वनिरूपकत्वावच्छिन्नभेदनिवेशाभिप्रायेण ; साध्यनिष्ठाधेयतानिरूपकसामान्यभेदनिवेशे च केवलान्वयिन्यव्याप्तिरेव दोष इति ध्येयम् ।

क्वचि दिति । " पृथिव्यन्यत्वविशिष्टद्रव्यत्ववत् द्रव्यत्वा " दित्यादौ । **अतिव्याप्ति** रिति । विशिष्टद्रव्यत्वस्य द्रव्यत्वानतिरेकितया पृथिव्यादे स्साध्यनिष्ठाधेयत्वानिरूपकत्वासम्भवादिति भावः । आधेयतायां साध्यतावच्छेदकावच्छिन्नत्वनिवेशे नैष दोषः, अधिकरणतानिरूपकतावच्छेदकस्यैवाऽऽधेयतावच्छेदकतया पृथिवीनिष्ठाधिकरणतानिरूपकतानवच्छेदकपृथिव्यन्यत्वविशिष्टद्रव्यत्वत्वादेः पृथिवी निरूपिताधेयताऽनवच्छेदकत्वादिति भावः ।

द्वितीयलक्षणे साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदनिवेशे धूमादौ नाव्याप्तिः, अतस्तत्कल्पे केवलान्वयिसाध्यकाव्याप्तिरेव, यत्किञ्चित्साध्यवद्व्यक्तिभेदनिवेशे च उभयस्थलएवाव्याप्तिरिति मूलाभिप्रायं स्फुटयति— **द्वितीयेचे** त्यादिना । **साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदः साध्यवैयधिकरण्ये विवक्षितः**— साध्यवैयधिकरण्यघटकतया

[दी] केवलान्वयिनि, यदि यत्किंचित्साध्यव्यक्तिभेदो वि
तदा नानाधिकरणसाध्यके सर्वत्राऽव्याप्तिः ॥

विवक्षित इत्यर्थः । केवलान्वयिनि— केवलान्वयिन्येव । न
णके ति । एकव्यक्तिसाध्यकेपि " सत्तावान् द्रव्यत्वा " दित्य
साध्यवतो भेदस्य अन्यस्मिन् साध्यवति सत्त्वादव्याप्तेः,
साध्यकेपि " एतद्वृत्तियावद्धर्मवान् एतत्त्वा " दित्यादौ
सम्भवाच्च " नानाव्यक्तिकेति " नोक्तम् ; तथाच द्वित
प्रायेण धूम इति मूलं नानाधिकरणसाध्यकसामान्योपलक्षकमि

इति सिंहव्याघ्रलक्षणे समाप्ते ।

अथ सार्वभौमपरिष्कारः ।

[दी] केचित्तु;— साध्ये ति । साध्यासामानाधिकरण्यं हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणे तेनैव सम्बन्धेन साध्यवद्वृत्तित्वस्याभावः तदधिकरणभिन्नत्वमर्थः;

साध्यासामानाधिकरण्यानधिकरणत्व मित्यत्र साध्यासामानाधिकरण्यपदेन साध्याधिकरणवृत्तित्वाभावविवक्षणेपि "द्रव्यं सत्त्वा" दित्यदावतिव्याप्ति नेसम्भवति, सामानाधिकरण्यस्याऽव्याप्यवृत्तितया सत्तादावपि गुणाद्यवच्छेदेन द्रव्यत्वादिसामानाधिकरण्याभावसत्त्वात्; किन्तु "वह्निमान् धूमा" दित्यादावव्याप्तिः, स्वावयवाद्यवच्छेदेन धूमादावपि वह्न्यादिसामानाधिकरण्याभावसत्त्वात्; सापि हेतुतावच्छेदकसम्बन्धेन यद्धेतुमत् तदवच्छिन्नत्वेनाऽभावं विशेष्य वारयितुं शक्यतइत्यभिप्रायेण तत्पदं तादृशाभावपरतया वर्णयतः सार्वभौमस्य मतमुपन्यस्यति—केचित्त्वि ति ।

हेत्वधिकरण इति । सप्तम्यर्थोऽभावान्वय्यवच्छिन्नत्वम् । तेनैव सम्बन्धेने ति तृतीयार्थोपि वृत्त्यन्वितमवच्छिन्नत्वम्; वृत्तिपदस्य सम्बद्धार्थकत्वे तु अभेदएव तदर्थः । अनधिकरणत्वपदस्य अधिकरणत्वाभावः अभावमात्रं वा यद्यर्थस्स्यात्? तदा अव्याप्यवृत्त्यधिकरणताया अव्याप्यवृत्तितया सत्तादौ द्रव्याद्यवच्छेदेन साध्यसामानाधिकरण्याभावाधिकरणत्वाभावस्य सामानाधिकरण्यरूपतया तदभावस्यचाऽक्षतत्वा दतिव्याप्ति स्तदवस्थैवेत्यनधिकरणपद माधिकरणभेदवदर्थकतया व्याकरोति—तदधिकरणाभिन्नत्व मिति । यद्यपि अधिकरणभेदेनाऽभावभेदाभावात् संयोगादिना धूमाद्यधिकरणपर्वताद्यवच्छिन्नो य स्सम्बन्धान्तरेण तद्वृत्तिरूपादिनिष्ठवह्निमत्संयुक्तत्वाद्यभावः तस्यैव स्वावयवाद्यवच्छेदेन धूमादौ वर्तमानतया धूमादेस्तादृशाभावानधिकरणत्वं दुर्घटम्, तथापि तादृश

[दी] तेन धूमस्य स्वावयवे संयोगेन

हेत्वधिकरणावच्छिन्नत्वविशिष्टाभावानधिकरणत्वस्यैव विवक्षणीयतया न दोषः ; " रूपे पर्वते न वह्निमत्संयुक्तत्व " मिति प्रतीतिवत् " पर्वते धूमे न वह्निमत्संयुक्तत्व " मिति प्रतीत्यनुदयात् पर्वतावच्छिन्नत्वविशिष्टनिरूपिताया वह्निमत्संयुक्तत्वाभावीयविलक्षणाधिकरणतायाः रूपादावेवोपगमात् । अभावाधिकरणतायामेवयाऽधिकरणविशेषावच्छिन्नत्वं निवेशनीयम् , तावतापि धूमरूपयोः अभिन्नस्याप्यभावस्य परस्परानवच्छेदकावच्छिन्नाधिकरणताभेदेन कथितदोषनिराकरणसम्भवात् ।

उभयत्र हेतुतावच्छेदकसम्बन्धप्रवेशप्रयोजनं क्रमेण दर्शयति— **तेने** ति । **स्वावयवे संयोगेनावृत्तावपी** त्यन्वयः । तथाच स्वावयवाद्यवच्छेदेन साध्यवत्संयुक्तत्वासत्त्वेन तदभावस्याऽक्षततया प्रथमतो हेतुतावच्छेदकसम्बन्धानिवेशे स्वावयवरूपस्वाधिकरणावच्छिन्नसाध्यवत्संयुक्तत्वाभावानधिकरणत्वविरहेण संयोगेन धूमहेतौ कस्यापि साध्यस्य व्याप्तिर्नस्यादिति भावः । यद्यपि तादृशसम्बन्धानिवेशेपि वह्निमत्संयुक्तत्वादेः कालिकाव्याप्यवृत्तितया धूमादावुत्पत्तिकालावच्छेदेन वह्निमत्संयुक्तत्वाभाववृत्तेः पर्वतादेरपि कालोपाधितया तादृशाभावावच्छेदकत्वादव्याप्तितादवस्थ्यम् , तथापि " इदानी " मिति प्रतीतिनियामकात्कालस्यावच्छेदकत्वात् " इहे " ति प्रतीतिनियामकदेशनिष्ठावच्छेदकतायाः वैलक्षण्यं दुरपह्नवम् , यदभावात् " पर्वते धूमे न वह्निमत्संयुक्तत्व " मिति प्रत्ययाभावः हेतुमन्निष्ठतादृशावच्छेदकतानिरूपकत्वमेव निवेश्यम् . अतो न दोषः । नच कालोपाधेरवच्छेदकताया मवच्छेद्याधिकरणेनाऽवच्छेदकस्य कालिकसम्बन्धो नियामकः, इत्थञ्च तादृशसम्बन्धानवच्छिन्नत्वमेव देशस्यावच्छेदकतायां वैलक्षण्यम् , अन्यस्य दुर्वचत्वात् ; तथाच व्यभिचारिणि कालिकादिसम्बन्धेन हेतौ वर्तमाने साध्यसामानाधिकरण्याभावे

[दी] वह्निमति च

व्यभिचारनिरूपकाधिकरणीयावच्छेदकतायां कालिकसम्बन्धानवच्छिन्नत्व विरहादतिव्याप्तिरिति वाच्यम् ;– कालिकाव्याप्यवृत्तावपि कालिकसम्बन्धघटितात्मत्वाकाशत्वादिसामानाधिकरण्ये दैशिकसम्बन्धेनात्मत्वाद्यनधिकरणकालस्य देशविधयैवावच्छेदकत्वात् , कालविधया तस्यावच्छेदकत्वे तादृशसामानाधिकरण्यस्य कालिकाव्याप्यवृत्तितापत्तेः, कालिकसम्बन्धानवच्छिन्नत्वादन्यस्यैव वैलक्षण्यस्य देशविधयावच्छेदकतायां स्वीकरणीयत्वात् ।

हेत्वाधिकरण इत्यत्र हेतुपदं अधिकरणाभिन्नत्वानुयोगितत्तद्धेतुपरम् , अतो धूमाद्यन्तरसंयुक्तस्वावयवावच्छेदेन धूमादेस्तादृशाभाववत्त्वेपि न क्षतिः । एवञ्च व्याप्तेः प्रतिधूमादिकं भिन्नत्वेपि केनापि रूपेणाऽनुगतानां तासां धूमत्वादिकमवच्छेदकम् ।

यत्तु;—हेतुपदं हेतुतावच्छेदकावच्छिन्नपरमेव, हेतुतावच्छेदकसम्बन्धेन स्वानुयोगिनो यदधिकरणं तदनवच्छिन्ना या या अधिकरणता तदन्यत्वेन साध्यसामानाधिकरण्याभावाधिकरणतायाः विशेषणीयत्वान्नोक्तदोषः, नवाऽननुगमः; एवञ्च कालोपाधिविधया हेत्वाधिकरणस्य देशस्यावच्छेदकत्वेनोक्तदोषस्य हेतुतावच्छेदकसम्बन्धावच्छिन्नावच्छेदकत्वनिवेशेनापि वारणसम्भवः ; पर्वतरूपादौ हेतुतावच्छेदकसम्बन्धावच्छिन्नपर्वतादिनिष्ठावच्छेदकताकसाध्यसामानाधिकरण्याभाववत्त्वाप्रसिद्धावपि रूपादिनिष्ठनिरुक्ताधिकरणतायां धूमादिप्रसिद्धनिरुक्ताधिकरणतानां भेदस्याऽक्षततया तद्वदन्यत्वेन धूमादौ लक्षणसमन्वयादिति; तन्नसाधु;— तथासति **किञ्चे** त्याद्यग्रिमदोषासङ्गतेः, गगननिष्ठसाध्यसामानाधिकरण्याभावाधिकरणतायाएव उक्ताधिकरणताभिन्नायाः प्रसिद्धेः ।

वह्निमतिचे ति । तथाच **तेनैव सम्बन्धेने** त्यनुक्त्वा यत्किञ्चित्सम्बन्धेनेत्युक्तौ पर्वताद्यवच्छिन्नवह्निमत्संयुक्तत्ववत्यपि तदवच्छिन्न

[दी] समवायेनावृत्तावपि न क्षतिः ।

वह्निमत्समवेतत्वाभावसत्त्वात् धूमस्य वह्निव्याप्यत्वं नोपपद्यतइति भावः । साध्यवत्सम्बद्धत्वसामान्याभावनिवेशे वह्निमत्समवेतत्वाभावस्य लक्षणाघटकत्वेपि हेत्वधिकरणविशेषावच्छिन्नसाध्यवत्सम्बद्धत्वसामान्याभावस्याऽप्रसिध्या असम्भवो बोध्यः, साध्यवदसम्बद्धस्य हेतुमति सम्बन्धासम्भवात् अवच्छेद्याधिकरणसम्बन्धिनएव अवच्छेदकतया तन्निष्ठाभावे हेतुमतोऽनवच्छेदकत्वात् । नक्षति रिति । नाव्याप्तिर्नासम्भवश्चेत्यर्थः । साध्यवत्ता च साध्यतावच्छेदकसम्बन्धेन बोध्या, तेन समवायेन वह्नौ साध्ये संयोगेन धूमे हेतौ पर्वताद्यवच्छिन्नवह्निमद्वृत्तित्वसामान्याभावासत्त्वेपि नातिव्याप्तिः ; न वा सद्धेतावपि यत्किञ्चित्सम्बन्धेन यत्साध्यवान् तद्वृत्तित्वाभावस्य स्वाधिकरणावच्छेदेन सत्त्वेपि दोषः ।

साध्यवत्त्वञ्चोपलक्षणविधया ऽभावप्रतियोगितावच्छेदककोटौ निवेशनीयम्, न तु विशेषणविधया; तेनोत्पत्तिक्षणावच्छिन्नघटादौ गन्धाद्यसत्त्वात्तादृशघटाद्यवच्छेदेन पृथिवीत्वादौ गन्धादिविशिष्टवृत्तित्वाभावसत्त्वेपि "गन्धवान् पृथिवीत्वात" इत्यादौ, मूलावच्छिन्नवृक्षादौ कपिसंयोगाद्यसत्त्वात् तादृशवृक्षाद्यवच्छेदेन एतद्वृक्षत्वादौ कपिसंयोगादिविशिष्टवृत्तित्वाभावसत्त्वेपि "कपिसंयोगी एतद्वृक्षत्वा" दित्यादौ वा नाव्याप्तिः; तत्तत्कालदेशावच्छिन्नतत्तदधिकरणावच्छेदेनापि तत्र तत्र हेतौ तादृशसाध्योपलक्षितधर्मिवृत्तित्वसत्त्वात् । नचैवमपि धूमादौ पर्वतवृत्तेरनवच्छेदको यो देशः कालो वा तदवच्छिन्नपर्वताद्यवच्छेदेन वह्न्यादिमद्वृत्तित्वाभावस्य धूमादौ सत्त्वादव्याप्ति र्दुर्वारैवेति वाच्यम्;— तत्तद्देशकालावच्छिन्नपर्वतादे र्धूमाद्यसम्बन्धितया धूमादावभाववृत्तावपि तादृशस्यावच्छेदकत्वात् । नचैवं "उत्पत्तिक्षणविशिष्टपर्वते धूमस्य न वह्निमत्संयुक्तत्व" मित्यादिप्रतीत्यनुपपत्तिः; "द्रव्यत्वे गुणे न पृथिवीत्व

[दी] तादृशाभावश्च सम्बन्धान्तरेण वर्तमाने

ामानाधिकरण्य " मित्यादिप्रतीतिवदुक्तप्रतीते स्सामानाधिकरण्यावच्छेद त्वाभावावलम्बनता न सम्भवति, विशेष्यस्यावच्छेदकत्वे विशिष्टस्यावच्छे ेकत्वासम्भवात् इतिवाच्यम्; तादृशप्रतीतीनां सामानाधिकरण्ये विशिष्ट र्वतावच्छेद्यत्वाभावावगाहितयैवोपपत्तेः । " उत्पत्तिक्षणे पर्वते धूमस्य न ह्निमत्संयुक्तत्व " मित्यादौ पर्वतावच्छिन्नं यत् धूमस्य वह्निमत्संयुक्तत्वं ास्योत्पत्तिक्षणो नावच्छेदक इत्यादिरप्यर्थः सम्भवति; धूमनिष्ठवह्निम ंयुक्तत्वाभावे उत्पत्तिक्षणपर्वतोभयावच्छिन्नत्वं तु नार्थः; पर्वतस्य प्रतियो यवच्छेदकतया तदन्तर्भावेण द्वयोरभावावच्छेदकत्वस्यासम्भवात्, घट ाटयो र्घटत्वाभावाधिकरणतावत्; एतेन उक्तोभयावच्छिन्नसाध्यसामानाधिकर ण्याभावव्यावर्तनाय हेत्वधिकरणमात्रावच्छिन्नत्वप्रवेशनं केषाञ्चिदनुपादेयमेव; ाथासति वह्न्यादिनिष्ठधूमसामानाधिकरण्याभावस्याप्ययोगोळकस्वावयवो नयावच्छिन्नतया हेतुतावच्छेदकसम्बन्धेन हेतुमन्मात्रानवच्छेद्यतया अति ्याप्तिप्रसङ्गाच्च ।

केचित्तु;— विशिष्टपर्वतादे रवच्छेदकतामादाया ऽव्याप्तिवारणाय ाच्छेदकान्तरानवच्छिन्नहेत्वधिकरणावच्छिन्नत्व मभावे निवेशनीयम्; एवञ्च र्वतादेः कालविधया धूमनिष्ठवह्निमत्संयुक्तत्वाद्यभावावच्छेदकत्वस्यापि ्याप्तिः, पर्वतादे स्स्थूलकालतया वह्निमत्संयुक्तत्वादिरूपप्रतियोगिनो ्यवच्छेदकत्वात् तन्निष्ठाभावावच्छेदकताया अविरोधाया ऽवान्तरकालाव च्छिन्नत्वोपगमात् इत्याहुः ।

हेतुमदसम्बद्धे साध्यसामानाधिकरण्याभावस्योक्तयुक्त्या हेत्वधिकरणा वच्छिन्नत्वविरहात् हेतुतानवच्छेदकसम्बन्धेन हेतुमत्सम्बद्धे हेतुमद वच्छिन्नतादृशाभावप्रसिद्धिमाह— तादृशे ति । हेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वस्य तेनैव सम्बन्धेन हेतुमदवच्छिन्नाभावश्चेत्यर्थः ।

[दी] तत्रैव सुलभः ।

तत्रैव-- तादृशहेतुमत्येव । नच तथाविधरूपादौ वह्निमत्संयुक्तत्वाभावो व्याप्यवृत्तिरेवेति तत्राधिकरणविशेषस्यावच्छेदकत्वं निर्युक्तिकम्, प्रतियोगिमत्यभाववृत्तावेव विरोधभञ्जनार्थमवच्छेदकभेदापेक्षणात्; धूमवत्कपालादिसमवेतएव वह्निमन्महानसादिसंयुक्तघटादौ महानसाद्यवच्छेदेन वह्निमत्संयुक्तत्ववति हेतुमत्कपालाद्यवच्छेदेन वह्निमत्संयुक्तत्वाभाव सौलभ्येपि "एतद्रूपवानेतद्रसा" दित्यादौ एतद्रूपादिमत्समवेतत्ववति हेत्वधिकरणावच्छेदेन प्रतियोगिसत्त्वात् तदवच्छेदेन साध्यसामानाधिकरण्याभाववत्त्वासम्भवात् एतद्रूपादिमति सम्बन्धान्तरमात्रेण वर्तमाने साध्यवत्समवेतत्वाभावस्य व्याप्यवृत्तितया हेत्वधिकरणावच्छिन्नत्वविरहेण निरुक्ताभावाप्रसिद्धे र्दुर्वारत्वादिति वाच्यम्;-- "पर्वते रूपे न वह्निमत्संयुक्तत्व" मिति प्रतीतिबलेन व्याप्यवृत्तेरपि सामानाधिकरण्याभावस्याधिकरणविशेषावच्छिन्नत्वोपगमात् ।

यत्तु;— व्याप्यवृत्तेरभावस्याधिकरणविशेषावच्छिन्नत्वानुपगमे हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावाधिकरणतासामान्ये हेत्वनुयोगिकत्वहेत्वधिकरणविशेषावच्छिन्नत्वोभयाभावो विवक्षणीयः;तथाच धूमादिनिष्ठस्वावयवाद्यवच्छिन्नतदधिकरणतायां हेतुतावच्छेदकसम्बन्धेन हेतुमदवच्छिन्नत्वस्य रूपादिनिष्ठवह्निमत्संयुक्तत्वाद्यभावाधिकरणतायां घटादिनिष्ठधूमवत्कपालाद्यवच्छिन्नतदधिकरणतायांच हेत्वनुयोगिकत्वस्याभावेन उभयाभावसत्त्वाल्लक्षणसमन्वयइति;—

तन्न;— व्याप्यवृत्ते रवच्छेदकानुपगमे "पृथिवी रूपात" इत्यादावतिव्याप्तेः, पृथिवीत्वादिव्यभिचारिजलीयरूपादिनिष्ठसाध्यसामानाधिकरण्याभावस्य व्याप्यवृत्तितया तदधिकरणतासामान्ये निरुक्तोभयाभावस्याक्षतत्वात् ।

[दी] व्यभिचारिणस्तु व्यभिचारनिरूपकाधिकरणएव तादृशि तादृशाभाववत्त्वम् , " सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्य" मितिप्रतीतेः । नचैवं विशिष्टसत्त्वेऽव्याप्तिः,

---

अथ हेत्वधिकरणावच्छिन्नत्वस्थाने अवच्छिन्नत्वहेत्वधिकरणानवच्छिन्नत्वोभयाभावस्यैव निवेशनीयत्वा न्नायं दोषः, जलरूपादिनिष्ठपृथिवीसमवेतत्वाभावाधिकरणतायां अवच्छिन्नत्वविरहेणोभयाभावसत्त्वात् ; एवं च तावतैव दर्शिताप्रसिद्धेरपि निवारितत्वात् तादृशोभयाभाववदधिकरणतावदन्यत्वमेव निवेशनीयम् . नतूक्ताधिकरणतासामान्ये हेत्वनुयोगिकत्वतादृशोभयाभाववत्त्वोभयाभावः, प्रयोजनविरहात्; इतिचेत् ?-- एवमपि वक्ष्यमाणायाः कालिकसम्बन्धेन हेतावव्याप्तेरसङ्गतिर्दुर्वारैव; तत्र कालिकसम्बन्धेनाऽवृत्तिगगनादावेव दर्शितोभयाभाववत्साध्यसामानाधिकरण्याभावाधिकरणतायाः प्रसिद्धेः; अवृत्तावेव सर्वत्र तादृशाभावप्रसिध्या सम्बन्धान्तरेणवर्तमानपर्यन्तानुधावनविरोधश्च ; तस्माद्व्याप्यवृत्तेरप्यवच्छेदकवत्त्वमेव अन्थकाराभिमतमित्यवधेयम् ।

" द्रव्यं सत्त्वा " दित्यादावाशङ्कितामतिव्याप्तिमुद्धरति- **व्यभिचारिणश्चे** ति । **तादृशी** ति । हेतुतावच्छेदकसम्बन्धेन हेतुमतीत्यर्थः, अवच्छेदकत्वं सप्तम्यर्थः । **तादृशाभाववत्त्वम्**— हेतुतावच्छेदकसम्बन्धेन साध्यवद्वृत्तित्वाभाववत्त्वम् । अत्र प्रमाणाकांक्षायामाह— **सत्ताया** मिति । ईदृशप्रतीत्या द्रव्यत्वसामानाधिकरण्यवत्यामपि सत्तायां तदनवच्छेदकगुणाद्यवच्छेदेन तदभाववत्त्वावगाहनादिति भावः । **एवम्**— सत्तायां द्रव्यत्वसामानाधिकरण्याभावोपगमे । **विशिष्टसत्त्वे**— गुणाद्यन्यत्वविशिष्टसत्तात्वाद्यवच्छिन्ने । **अव्याप्ति** रिति । गुणाद्यवच्छेदेन साध्य

[दी] विशिष्टस्यातिरिक्तत्वात् ।

सामानाधिकरण्याभाववति केनापि रूपेण तदनधिकरणत्वासम्भवादि
भावः । **विशिष्टस्ये** ति । तथाच विशिष्टसत्त्वं द्रव्यमात्रवृत्ति, त
धिकरणत्वं न गुणादेरिति न हेत्वधिकरणावच्छेदेन हेतौ साध्यसा
नाधिकरण्याभाववत्त्वमिति भावः ।

यद्यपि हेतुतावच्छेदकविशिष्टहेत्वधिकरणावच्छिन्नत्वं निवेश्यापि
मव्याप्ति श्शक्यते वारयितुम् , तथापि प्रकारान्तरेण वारणसम्भवे लक्ष
अधिकनिवेशनमनुचितमित्यभिप्रेत्य विशिष्टातिरिक्तत्वादिपक्ष आश्रितः
नच हेतुतावच्छेदकविशिष्टाधिकरणतानिवेशनमावश्यकम् , अन्यथा " इ
स्पर्शवत् भूतत्वमूर्तत्वोभयस्मा " दित्यादौ भूतत्वे मूर्तत्वे च हेतौ स्वा
करणे गगने मनसि च साध्यसामानाधिकरण्यविरहेणाव्याप्तिप्रसङ्गादि
वाच्यम् ; उभयत्वस्यैकविशिष्टापरत्वरूपतामवलम्ब्य विशिष्टस्यातिरि
क्तया तत्र स्वावच्छिन्ननिरूपिताधिकरणत्वरूपपरम्परासम्बन्धेन उभयत्वस्य
हेतुत्वमिति स्वीकृत्यैव वा तत्राऽव्याप्ते स्समाधानसम्भवात् । ननु " द्र
गुणाद्यन्यत्वे सति सत्त्वा " दित्यादौ विशिष्टातिरिक्तत्वपक्षमवलम्ब्य
व्याप्तेर्वारणं न विचारसहम् , तथाहि;- गुणादिवृत्तिसत्तादितो गुणाद्यन्य
विशिष्टसत्तादे रतिरिक्तत्वे अनुगतधर्ममात्रोच्छेदः, एकव्यक्तिवृत्तित्वविशि
स्याऽपरव्यक्तिवृत्त्यन्यत्वात् । नच तत्तद्व्यक्तिवृत्तित्वविशिष्टसत्तादे
मिथो भेदेपि शुद्धसत्तादिकमनुगतं निराबाधमेवेति वाच्यम्; शु
सत्तादौ तत्तद्व्यक्तिवृत्तित्ववैशिष्ट्याभ्युपगमे भवतां तदेकत्वासम्भवा
तदनभ्युपगमे तस्याः अवृत्तित्वप्रसङ्गात् । एवं सर्वेषामेव वस्तूनां त
त्क्षणवृत्तित्वरूपविशेषणभेदाद्भेदप्रसक्त्या क्षणभङ्गापत्तिपर्यवसानं दुर्वारमे

[दी] अनतिरेके तु विशेषणविशेष्यसम्बन्धस्यैव परम्परया

अथ प्रत्यभिज्ञाद्यनुरोधेन एकस्मिन्नानादेशकालवृत्तित्ववैशिष्ट्यं क्रियत एव, परन्तु "गुणे द्रव्यवृत्तित्वविशिष्टसत्ता नास्ति," "इदानीं क्षणवृत्तित्वविशिष्टघटो नास्ती" ति प्रतीत्यनुरोधेन मिथो भिन्ना अपि त द्विशेषणविशिष्टसत्त्वघटादयः स्वीक्रियन्ते, तदवलम्बनतयैव तादृश स्युपपत्तेः द्रव्यवृत्तित्वादिवैशिष्ट्यपुरस्कारेणचानुगतसत्त्वादेः न द्रव्य नुमापकता स्वीक्रियते, अपि तु तदन्यतादृशविशेषणविशिष्टगुणाश्रय वस्तुन एवेति तत्र द्रव्यत्वादिव्याप्तेर्विरहेपि न क्षति रितिचेत्? ता वस्तूनां केन रूपेण व्याप्यता?, न द्रव्यवृत्तित्वादिविशिष्टत्वेन, ताद धर्मस्याव्याप्यानुगतधर्मसाधारण्यात् ; नापि तादृशविशेषणविशिष्टतद्व क्तित्वादिना, तादृशविशेषणवैशिष्ट्यांशस्य व्यर्थत्वात्, तद्व्यक्ति ध्यनुपस्थितावनुमानानिर्वाहाच्च। एवं " विशिष्टसत्ता नास्ती " त्यत्र विशि सत्तात्वाद्यवच्छिन्नाभावस्य न विषयतासम्भवः, तद्रूपावलीढानुगतस वति तद्रूपावच्छिन्नाभावासम्भवात्। नापि तद्व्यक्तित्वावच्छिन्नाभाव तद्व्यक्तित्वस्य प्रतियोगिकोटावनुल्लेखात्। विशेषणावच्छिन्नप्रतियोगि स्सम्बन्धो विलक्षणः, स च नानुगतसत्तायास्सम्बन्धः, अपि तु तद रिक्तविशिष्टसत्ताया एवेति प्रतियोगितावच्छेदकधर्मस्य गुणादिवृत्तिस साधारण्येपि तत्र विशिष्टाभावोऽक्षत एव, प्रतियोगितावच्छेदकावच्छि प्रतियोगिताकसम्बन्धशून्यत्वमात्रस्य विशिष्टाभावसत्त्वे अपेक्षितत्वात् चेत्?– तर्हि गुणादिसाधारणसत्ताया एव तादृशातिरिक्तसम्बन्धो गुणादि वृत्त स्स्वीक्रियताम्, किं सम्बन्ध्यन्तरकल्पनेनेत्यभिप्रेत्याह— **अनति** रेके ति। **विशेषणविशेष्यसम्बन्धस्यैवे** ति। सत्तादिनिष्ठगुणाद्यन्त वैशिष्ट्यस्यैवेत्यर्थः। **परम्परया**— परम्परासम्बन्धेन; स्वावच्छि

[दी]व्याप्यत्वात् केवलान्वयिन्यव्याप्त्यभिधानं द्वितीयलक्षणाभिप्रायेणे त्याहुः; तच्चिन्त्यम् ।

निरूपितसमवायादिसम्बन्धेनेति यावत् । व्याप्यत्वा दिति । गुणाद्यन्य त्ववैशिष्ट्यावच्छिन्नाधिकरणताया: गुणादावसत्त्वात् तादृशसम्बन्धेन तद्वै शिष्ट्यस्य द्रव्यमात्रवृत्तित्वादिति भावः । एवकारेण सत्तायाः व्याप्यत्व व्यवच्छेदः । यत्र विशेषणविशेषावच्छिन्नसत्ताहेतुकद्रव्यत्वाद्यनुमितिरभि मता, तत्र तद्वैशिष्ट्यहेतुकानुमितिरेवोपेयते, वैशिष्ट्ये परम्परासम्बन्धेन व्याप्तिधीविरहेचानुमितिरसिद्धैवेति भावः ।

यद्यपि विशिष्टनिरूपितसम्बन्धस्य विलक्षणत्वे तादृशसम्बन्धेन सत्ताया अपि व्याप्यत्वं निर्वहति, तथापि विशेषणावच्छिन्ननिरूपित समवायत्वादिना न सत्तादि सम्बन्धता,किन्तु "विशिष्टसत्तावा"निति प्रत्यये वैशिष्ट्यस्यैव सत्तादिविशेषणतापन्नस्योक्तपरम्परासम्बन्धेन धर्मिणि विशे- षणत्वोपगमात् नातिप्रसङ्ग इत्याशयेनेदमभिहितम् । नन्वेवंरीत्या प्रथम लक्षणपरिष्कारे वक्ष्यमाणकेवलान्वयिसाध्यकाव्याप्त्यसङ्गतिः, तत्रापि सम्ब न्धान्तरेण हेतुमद्वृत्तौ हेत्वधिकरणावच्छिन्नसाध्यसामानाधिकरण्याभाव प्रसिध्द्या लक्षणगमनसम्भवात् अतआह—केवलान्वयिनी ति । द्वितीय लक्षणे ति । नच तच्चे त्यनेन उभयत्वावच्छिन्नस्यैव परामर्शात् प्रथम लक्षणेऽव्याप्त्यसम्भवे असङ्गतिर्दुर्वारैवेति वाच्यम्,केवलान्वयि साध्यकेधूमेच्या व्याप्तिप्रदर्शनात् तदुभयत्वेनोपस्थितप्रथमलक्षणे अव्याप्त्यसम्भवेपि लक्षणद्वये यथायोगं तत्तत्स्थले अव्याप्त्यन्वये तात्पर्यात् । यद्यपि धूमादावपि साध्य सामानाधिकरण्यसामान्याभावघटितस्य प्रथमलक्षणार्थस्य नाव्याप्त्यवकाशः, तथापि यत्किंचित्साध्यवद्व्यक्तिभेदनिवेशाभिप्रायेण द्वितीयलक्षणस्येव य त्किंचित्साध्यसामानाधिकरण्याभावनिवेशाभिप्रायेणैव प्रथमलक्षणस्यापि ना-

[दी] "सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्य" मिति प्रतीतिर्हि "द्रव्यत्वे गुणे न पृथिवीत्वसामानाधिकरण्य" मिति प्रतीतिवत् सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्य परम्परासम्बन्धेन,

---

नाव्यक्तिसाध्यके अव्याप्तिप्रदर्शनमविरुद्धम्। मूले च **यत्किंचित्साध्यानधिकरणाधिकरण** इत्युपलक्षणम्, यत्किंचित्साध्याधिकरणावृत्तावित्यपि बोध्यम्; तेन प्रथमलक्षणाव्याप्तिसम्पादकहेत्वकथनान्न्यूनत्वस्य नावकाश इति ध्येयम्।

सामानाधिकरण्यस्याऽव्याप्यवृत्तितायां प्रमाणसिद्धायामेव दर्शितातिव्याप्तिं वारयितुं शक्यते, तत्रैव न प्रमाणम्, उक्तप्रतीतेरन्यविषयकत्वादित्याह– **सत्ताया** मिति। **प्रतीतिर्हि** ति। **अभावं गुणे अवगाहत** इत्यनेनाऽन्वयः। **अवच्छेदकत्वस्ये** ति। निरूपकत्वस्येत्यर्थः; तेन सामानाधिकरण्यस्य व्याप्यवृत्तितामते तदवच्छेदकत्वस्याऽप्रामाणिकत्वेपि न क्षतिः। उक्ताकारप्रतीतावच्छेदकत्वानुल्लेखात् अवच्छेदकत्वाभावावगाहिता न सम्भवतीत्याशङ्क्याह– **परम्परे** ति। ननु उक्तपरम्परासम्बन्धो न वृत्तिनियामकः, 'आकाशं द्रव्यत्वसामानाधिकरण्यवत्' इत्यप्रत्ययादित्युक्तसम्बन्धावच्छिन्नाभाव एवाऽप्रामाणिक इति तादृशाभावावलम्बनतापि नोक्तप्रतीते स्सम्भवतीत्याशङ्कोद्धारायाऽनुरूपं दृष्टान्तमाह– **द्रव्यत्व** इति। गुणस्यावच्छेदकतानियामकद्रव्यत्वसम्बन्धशून्यतया द्रव्यत्वनिष्ठाभावावच्छेदकत्वं न सम्भवतीत्यगत्या गुणनिष्ठो द्रव्यत्वपृथिवीत्वसामानाधिकरण्यावच्छेदकत्वस्य परम्परासम्बन्धावच्छिन्नतादृशसामानाधिकरण्यस्य वा अभाव एव तादृशप्रतीतिविषय इत्यवश्यमुपेयम्, तद्वदत्रापीत्यर्थः।

[दी] सामानाधिकरण्यस्यैवा ऽभावं गुणेऽवगाहते, न तु सत्तायामेव द्रव्यवृत्तित्वाभावम् , 'सत्ता न द्रव्यवृत्तित्वाभाववती' 'द्रव्यवृत्तित्वाभावो वा न सत्तावृत्ति' रित्यादिसर्वजनप्रसिद्धप्रतीतिबाधितत्वात् ।

स्वरूपतो यादृशशब्दाद्यादृशार्थः प्रतीयते तादृशशब्दोल्लिखित प्रत्यये तादृशार्थविषयकत्वमेवाऽसति बाधके युज्यतइ त्याशयेन दर्शित प्रतीतेः स्सत्तायां गुणावच्छिन्नद्रव्यवृत्तित्वाभावावगाहितायां बाधकप्रतीति माह— **सत्ता न द्रव्यवृत्तित्वाभाववती** ति । नच द्रव्यवृत्तित्वाभावाभावस्य द्रव्यवृत्तित्वरूपस्य सत्ताया मस्मन्मतेपि सत्त्वा न्न तस्याः प्रतीते र्बाधकत्वं सम्भवति, विरोध्यविषयकत्वादिति वाच्यम् ; तादृश शब्देन द्रव्यवृत्तित्वाभाववद्भेदस्यैव प्रत्यायनात् , तदाकारप्रतीतेरपि तद्भेदावगाहितया बाधकत्वात् , भेदस्याव्याप्यवृत्तिताविरहेण सामानाधिकरण्याभाववद्भेदस्य तदभावविरोधित्वात् । यदि च भेदस्याव्याप्यवृत्तित्वमत मवलम्ब्य तादृशप्रतीतेः विरोध्यविषयकत्व मुपपाद्यते ? तदा सत्तायां द्रव्यत्वसामानाधिकरण्याभावेपि तदधिकरणभिन्नत्वस्या ऽक्षत तया ऽतिव्याप्तिवारण मशक्यमेवेति भावः ।

अव्याप्यवृत्तित्वसाधकदर्शितप्रतीते रभावरूपविशेष्ये सत्तावृत्तित्वावगाहिताया उपगमात् तादृशाभावविशेष्यकसत्तावृत्तित्वविरोधिविषयक प्रत्ययं बाधकतयोपन्यस्यति– **द्रव्यवृत्तित्वाभाव इति** । यद्यपि द्रव्यवृत्तित्वाभावे सत्तावृत्तित्वं गुणाद्यवच्छेदेन, न तु द्रव्यावच्छेदेनेति तद वच्छेदेन तत्र सत्तावृत्तित्वाभाव स्सम्भवति, एवं सत्तावृत्तित्वं सत्तात्वसामानाधिकरण्यरूपम्, सामानाधिकरण्यस्याऽव्याप्यवृत्तितामते अव्याप्यवृत्तीति तदनवच्छेदकगुणत्वाद्यवच्छेदेन द्रव्यवृत्तित्वाभावे तदभाव स्सम्भवत्येवेति न विरोधः, तथाप्युक्तयुक्त्या दर्शितप्रतीते स्सत्तावृत्तिभेदावगाहितया

[दी] बाधकाभावात्तु संयोगतदभावयो रवच्छेदकभेदेन एकत्र प्रतीत्या तदुभयो रेकत्र सिद्धिः । अतीन्द्रियसाध्यके अतीन्द्रिये व्यभिचारिण्यतिप्रसंगाच्च । तत्र सामानाधिकरण्याभावस्य

बाधकत्वं दुर्वारमेव । यत्तु; सत्तावृत्तावभावे अवच्छेदकभेदेन सत्ता वृत्तित्वाभावसम्भवेपि अवच्छेदकाप्रतीतिदशायां जायमानतत्प्रत्ययस्य सत्ता वृत्तित्वग्रहप्रतिबन्धकतया तदुत्तरं जायमानायाः " सत्तायां गुणे न द्रव्यत्व सामानाधिकरण्य " मिति प्रतीते स्वसामानाधिकरण्याभावे सत्तावृत्तित्वाभा वावगाहित्वासम्भवेन गुणनिष्ठसामानाधिकरण्यावच्छेदकत्वाद्यभावावगा हित्वे सर्वत्रैव तदवगाहित्वकल्पन मुचितमिति भाववर्णनम्; तद सत्;-- एवंसति अवच्छेदकाविषयिण्या द्रव्यत्वसामानाधिकरण्यत्वेन सत्तायां तत्सामानाधिकरण्यविषयकप्रतीतेरपि बाधकतासम्भवेन " सत्ता न द्रव्य वृत्तित्वाभाववती " इत्यादिप्रतीतिपर्यन्ता ऽनुधावनस्य निर्बीजत्वापातात् ।

नन्वेवं संयोगादिमति संयोगादेरप्यभावो मा सैत्सीत्, "मूले न संयोग" इति प्रतीतेरपि मूलनिष्ठसंयोगाद्यवच्छेदकत्वाभावाऽवलम्बनतयोपपत्तेरि त्यत आह-- **बाधकाभावा** दिति । तत्र " कपिसंयोगाभावो वृक्षावृत्तिः " इत्यादिप्रत्ययस्याऽननुभवादिति भावः । ननु संयोगाभावे वृक्षावृत्तित्वप्रत्यय इव द्रव्यवृत्तित्वाभावे सत्तावृत्तित्वाभावप्रत्ययेपि विवादसम्भवात् यत्र सामानाधिकरण्याभावस्य न प्रत्यक्षसम्भवः तत्र तत्सत्त्वे मानाभावेन तदनधिकरणत्वं निष्प्रत्यूहमित्यातिव्याप्तिरित्याह—**अतीन्द्रियसाध्यक** इति। " इदं गुरु- द्रव्यत्वात् " " पृथिवी-गुरुत्वात् " इत्यादावित्यर्थः । अथवा स्तम्भादौ पिशाचत्वाभावस्येव स्तम्भत्वादौ पिशाचत्वसामानाधिकरण्या भावस्य, महति वायौ रूपाभावस्येव महावायुत्वादौ रूपसामानाधि करण्याभावस्यापि प्रत्यक्षत्वादुभयत्रातीन्द्रियत्वोपादानम् । **तत्रे** ति । गुरुत्वादिसाध्यकस्थले साध्यसामानाधिकरण्याभावस्या ऽतीन्द्रियप्रतियोगिक

[दी]प्रत्यक्षासम्भवेनासिद्धेः । नच तदभाववद्वृत्तित्वेन तत्र तदनुमेयम् ; तद्वद्वृत्तिभिन्नत्वस्योपाधित्वात् ।

किंच "इदमिदानी" मिति प्रतीतिनियामकविशेषणताविशेषेण

तया अतीन्द्रियहेतुकस्थले च धर्मिण एव तथात्वात् हेतौ साध्यसामानाधिकरण्याभावस्य प्रत्यक्षासम्भवेन तत्र तदसिद्धेरित्यर्थः । **तदभाववद्वृत्तित्वेन**— गुरुत्वाभाववद्वृत्तित्वेन । **तत्र**- द्रव्यत्वादौ ! **तत्**— गुरुत्वादिमद्वृत्तित्वाभाववत्त्वम् । **अनुमेय** मिति । तद्विरुद्धदृष्टान्तेनेत्यादिः । **तद्वदि** ति । गुरुत्वादिमदित्यर्थः । **उपाधित्वा** दिति । तद्वद्वृत्तिभिन्नत्वस्य तद्विरुद्धदृष्टान्ते साध्यव्यापकतायाः पक्षीभूते प्रकृतहेतौ च भेदस्य व्याप्यवृत्तित्वेन साधनाव्यापकताया स्सुग्रहत्वात् पक्षे साध्यसन्देहेन पक्षावृत्तितादृशोपाधौ सन्दिग्धोपाधेर्दुर्वारत्वात् अनुकूलतर्कविरहेण साध्यव्यापकतानिश्चयासम्भवेपि सन्दिग्धोपाधेरपि दूषकत्वादिति भावः ।

नन्वेवमतीन्द्रियसंयोगादेरप्यव्याप्यवृत्तित्वं न स्यात् , तद्वति तदभावप्रत्यक्षासम्भवेनाऽसिद्धेः, अनुमानस्याप्रयोजकत्वात् । एवं सामानाधिकरण्यस्याव्याप्यवृत्तितामाश्रित्य मणिकृतैव सिद्धान्तलक्षणे हेतुसमानाधिकरणाभावे प्रतियोगिसामानाधिकरण्याभावस्य विशेषणताकल्पे **कर्मणि च संयोगाभावः प्रतियोग्यसमानाधिकरण** इति ग्रन्थेन अव्याप्यवृत्तिसाध्यकव्यभिचारिण्यातिव्याप्तिरुद्धृता, तथाच तन्मते युक्तिर्भवतु मा वा, उभयथापि तदाश्रित्य पूर्वपक्षलक्षणं व्याचक्षाणो नाऽपराध्यतीत्याशङ्क्य दूषणान्तरमाह— **किञ्चे** ति । **इदानी** मिति । कालिकविशेषणतात्मकविलक्षणसम्बन्धेनेत्यर्थः । अभावादेरिहेति प्रतीतिनियामको यो दैशिकविशेषणताविशेषः तत्र तादृशसम्बन्धवैलक्षण्यस्य प्रामाणिकतालाभाय विलक्षणप्रतीतिनियामकत्वाभिधानम् । नच इदानीमिति प्रतीतौ

[दी] हेतुतायां सद्धेतावव्याप्तिः, तेन सम्बन्धेनाधिकरणे काले तेन सम्बन्धेन साध्यवद्वृत्तित्वस्य विरहिणोऽप्रसिद्धेः ।

सम्बन्धवैलक्षण्याभावेपि कालत्वेनाधिकरणतावगाहनात् इहेति प्रत्ययात् तस्य वैलक्षण्यमुपपद्यत इति किं सम्बन्धवैलक्षण्येनेति वाच्यम्; सम्बन्ध विशेषानुयोगित्वादन्यस्य कालत्वस्य दुर्वचत्वात्, 'इदानीं कालत्वाभाव' इत्यादिप्रतीत्या काले कालत्वाद्यभाववृत्तेः प्रामाणिकत्वेपि 'काले कालत्वं नास्ती' ति प्रतीत्यनुदयात् 'नास्ती' त्याकारकप्रतीतौ कालिकसम्बन्धव्यावृत्तरूपावच्छिन्नाया एव विशेषणतायाः नियामकत्वस्यावश्यकत्वात् दैशिककालिकसम्बन्धसाधारणसम्बन्धतावच्छेदकस्याप्रामाणिकतया कालिकसम्बन्धे सम्बन्धावच्छेदकीभूतस्य वैलक्षण्यस्य सिद्धे र्निष्प्रत्यूहत्वाच्च। **सद्धेता** विति । कालत्वादिसाध्यकघटादिहेताविव्यर्थः । **काल** इति । कालावच्छेदेनेत्यर्थः । **अप्रसिद्धे** रिति । वृत्तिमतः कालावच्छेदेन कालत्वादिसामानाधिकरण्यवत्त्वादवृत्तिनिष्ठतदभावस्य कालानवच्छिन्नत्वात् अवच्छेद्याधिकरणासम्बन्धिनोऽनवच्छेदकत्वात् ।

अथ हेत्वधिकरणमहाकालावच्छेदेन महाकाल एव कालवृत्तित्वाभावः प्रसिद्ध्यति, महाकालस्य गगनादिवदवृत्तितया तत्र कालवृत्तित्वस्याऽसत्त्वात; स्वस्य तादात्म्यसम्बन्धेन स्वसम्बन्धितया स्वनिष्ठाभावावच्छेदकत्वसम्भवाच्च । नच तादात्म्यसम्बन्धो नावच्छेदकतानियामकः, "रूपे पर्वते न वह्निमत्संयुक्तत्व" मितिवन् "रूपे स्वस्मिन् न वह्निमत्संयुक्तत्व" मिति प्रतीते रसविवादत्वात् इति वाच्यम्; तथा सति तादात्म्यसम्बन्धेन व्यभिचारिणि तदतिरिक्तसम्बन्धेन स्वासम्बन्धिनि हेतौ तेन सम्बन्धेन हेतुमत्त्वावच्छेदेन साध्यसामानाधिकरण्याभाववत्त्वविरहादतिव्याप्तेः स्फुटतया तद्दोषापेक्षाया अनुचितत्वापातादिति चेत्;

अत्र केचित् ; — कालिकसम्बन्धेन गगनादेरपि वृत्तिमत्त्वमिति
भिप्रायकोयं ग्रन्थः, तथाच कालावच्छेदेन महाकालेपि कालिक
न्धेन साध्यवद्वृत्तित्वसत्त्वात् तद्विरहिणो ऽप्रसिद्धिर्न विरुध्यत इति वद
वस्तुतस्तु, स्वस्मिन् सामानाधिकरण्यतदभावयोः वृत्त्यवच्छेदकत्वे
धिकरणत्वमेव नियामकम्, न तु स्वसम्बन्धितामात्रम्, स्वाधि
वच्छेदेनैव स्वस्मिन् तत्प्रतीते रनुभवसिद्धत्वात् ; अत एव सम्ब
न्तरेण सम्बन्धिनीत्युपेक्ष्य **वर्तमान** इत्यभिहितम् । नचैवं तादा
वृत्त्यनियामकसम्बन्धेन व्यभिचारिण्यतिव्याप्त्यकथनात् न्यूनता दुर्वा
वाच्यम् ; तादृशसम्बन्धेन साध्यवद्वृत्तित्वस्य हेत्वधिकरणत्व
ऽप्रसिद्धयाऽतिव्याप्त्यसम्भवात् । नच तेन सम्बन्धेन सद्धेतौ लक्ष
मनाय वृत्तेरधिकरणतायाश्च स्थाने सम्बन्धप्रतियोगित्वानुयोगित्व
निवेशनीयत्वा दतिव्याप्ते रावश्यकतेति वाच्यम् ; प्राचां मते
सम्बन्धेन व्याप्त्यनभ्युपगमसम्भवेन वृत्त्यादेरपि निवेशसम्भवः इ
प्रायेणैवातिव्याप्त्यनुद्भावनात् ।

एतेन हेत्वधिकरणखण्डकालविशेषावच्छेदेन कालिकसम्ब
तदवृत्तौ तद्विषयकज्ञानएव साध्यासामानाधिकरण्यप्रसिद्धिस्सम्भ
नचैवमपि "कालत्ववान् सर्वस्मा" दित्यादौ खण्डकालस्य हेत्व
करणतया हेत्वधिकरणावच्छिन्नसाध्यासामानाधिकरण्याप्रसिद्धि र्दुर्व
वाच्यम्, हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणत्वपर्यन्तानिवेशेन वा
व्यासज्यवृत्तिधर्मावच्छिन्नस्य यत्र हेतुत्वं तत्र तादृशधर्मस्यैवैतन्मते
वच्छिन्ननिरूपिताधिकरणत्वरूपपरम्परासम्बन्धेन हेतुत्वस्य अभिम
उक्तस्थले सर्वत्वस्यैव तादृशसम्बन्धेन हेतुतया तादृशसम्बन्धेन
कालिकसम्बन्धेन कालवृत्तौ गगनत्वादावेव तादृशसम्बन्धेन सा
द्वृत्तित्वाभावस्य हेत्वधिकरणकालावच्छेदेन प्रसिद्धेरिति परा
तादृशकाले तज्ज्ञानस्य विषयतासम्बन्धसत्त्वेपि तादृशसम्बन्धस्य

नियामकत्वानभ्युपगमेन तज्ज्ञानस्य तत्कालीनताविरहेण च तस्य तज्ज्ञानानधिकरणत्वात् तज्ज्ञाने अभाववृत्तौ तत्कालस्यानवच्छेदकत्वात् ।

महाकालानुयोगिकविशेषणताविशेषेण घटादिहेतुकस्थलाभिप्रायकोयं ग्रन्थः, तादृशसम्बन्धेन हेतुमत्तायाः खण्डकालेऽभावान्नोक्तदिशाऽप्रसिद्धिः इत्यपि केचित् ।

अत्र स्वनिष्ठहेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावानवच्छेदकतादृशसम्बन्धावच्छिन्नस्वाधिकरणतावत्सामान्यकत्वं विवक्षणीयमिति नोक्ताव्याप्त्यवकाशः ; स्वावयवपरमाण्वाद्यवच्छेदेन घटादौ वर्तमाने कालत्वादिसामानाधिकरण्याभावे तदधिकरणकालसामान्यस्यानवच्छेदकतया तत्र लक्षणसमन्वयसम्भवात् केवलान्वयिसाध्यके मेयत्वादौ सर्वाधिकरणावच्छेदेनैव हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वसत्त्वात् तन्निष्ठतदभावाप्रसिद्ध्या ऽव्याप्ति र्न क्षति मावहति, मूलकृतैव तत्राव्याप्ते र्वक्ष्यमाणत्वात् । यदि चैवं "आत्मभिन्नं ज्ञानवदन्यत्वा" दित्यादौ हेतो रात्मान्यसकलवस्त्ववच्छेदेनैव दैशिकविशेषणतया साध्यवद्वृत्तित्वसत्त्वात् आत्मनश्च केनापि सम्बन्धेन हेतुमत्त्वाभावात् तदवच्छेदेन हेतौ साध्यसामानाधिकरण्याभाववृत्त्यसम्भावात् हेतुनिष्ठतादृशाभावाऽप्रसिद्ध्या अव्याप्तिरिति विभाव्यते?, तदा हेतुतावच्छेदकसम्बन्धेन यत्स्वाधिकरणं तदवच्छेदेन स्वस्मिन् वर्तते योऽभावः तत्प्रतियोगितानवच्छेदकतादृशसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वत्वकत्वं व्याप्ति रित्येव विवक्षणीयम् ; "कालत्ववान् घटात्" इत्यादौ कालावच्छेदेन घटादौ वर्तमानः कपालसमवेतत्वाद्यभाव एव प्रसिद्धः, तत्प्रतियोगितानवच्छेदकं च कालिकसम्बन्धावच्छिन्नकालवृत्तित्वत्वादिकमिति लक्षणसमन्वयः । हेतुमति हेतुताच्छेदकसम्बन्धेन यद्वृत्तिमत् तन्निष्ठतत्सम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावानवच्छेदक तत्सम्बन्धावच्छिन्नतद्वस्तुप्रकृतहेतूभयाधिकरणतावत्सामान्यकत्वं वा वक्तव्यम्, "आत्मभिन्नं ज्ञानवदन्यत्वा" दित्यादौ आत्मा

द्यवच्छेदेन घटत्वाभावादिनिष्ठात्मान्यवृत्तित्वाभावस्यानवच्छेदकं घटत्व भावज्ञानवदन्यत्वोभयाधिकरणतावत्सामान्यमिति लक्षणसमन्वयः । उभयाधि करणत्वनिवेशात् " वह्निमान् धूमा " दित्यादौ धूमादिसंयोगिनः कपालादे घटादिनिष्ठवह्निमत्संयुक्तत्वाभावावच्छेदकत्वेपि न क्षतिः, कपालादे स्संयोगेन घटानधिकरणतया उक्तोभयाधिकरणतावत्सामान्यानन्तर्गतत्वात् ।

अथवा हेतुतावच्छेदकसम्बम्धेन यद्धेत्वधिकरणं तदवच्छिन्न स्ववृत्तिकान्यहेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यवद्वृत्तित्वाभावकत्वविवक्ष णात् न कश्चिद्दोषः; सर्वत्र सद्धेतावन्ततः अवृत्तौ प्रसिद्धे साध्य सामानाधिकरण्याभाव एव तादृशस्ववृत्तिकान्यत्वसत्त्वेन लक्षणसमन्वयात् वह्न्यादिनिष्ठधूमादिसामानाधिकरण्याभावे अयोगोळकादेरिव तद्वृत्तित्व स्याप्यवच्छेदकत्वात् , स्वनिष्ठहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्त्यनवच्छि न्न हेतुतावच्छेदकसम्बन्धावच्छिन्नसाध्यसामानाधिकरण्याभावकत्वं वा वि क्षणीयमित्यादयः परिष्कारस्य पन्थानो द्रष्टव्याः ॥

इति गादाधर्यां सार्वभौमपरिष्कारः ।